BHAGVET PURAN 97
XII G. K'U.

7098

1. Title Bhāgavata Purāṇa, 13th Skandha.
2. Accession No. 5533
3. Folio No./Pages 42
4. Lines 15-16
5. Size 37.5 × 21.5Cm
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskṛit
9. Period Not available
10. Beginning "ओम् श्री गणेशाय नमः ।। श्री कृष्णाय नमः । ओम् जयंति श्री परानंद कृपापांगलम सहाशः"
11. End "भूतादिस्ताम सोहेकावः गुणै वृत्रिभिः सह ।।9।। श्रव्या कृतंप्रयानं ।।8।।
12. Colophon No
13. Illustrations No
14. Source Donation
15. Subject Purāṇa
16. Revisor No
17. Author Not Known
18. Remarks Written in four-sided mounted frame. Pages are not in order. Partly damaged by termite, bound.

श्री
भा॰टी॰

ॐ श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥ ॐ जयंति श्रीपदानंदकृपापारालसद्दृशः ॥ यानितमनुवर्तंते संपदो
विगतापदः ॥ उक्तसयोदशाध्याये हीदशोध्यायत्र्यंशः सन्तः ॥ अथ दिष्टानावधिताभ्यामाश्रयन्त्येश्वरः सन्तः ... उ
क्तो लुयावधित्वेन प्राकृतानंतिकेलये ॥ अथ दिष्टाननु याहे कोमहापुरुषवर्णानि ॥ तत्राद्यो षड्विंशाध्यायेः शुकः प्रा
हपरीक्षितं ते श्रोषं ते त्वत्राखिलान्याह सूतः सृष्टोष्ट्र सत्त्रिभिः ॥ स्वाश्रयश्रवणोकायेन विलंबो मनीषिणां ॥ ईषेषा
त्कालवैषम्यं चतुर्भिस्तावत्तद्व्यते ॥ तेनवप्रथमे सोमावमा यान्वयं भूमिसयानू ॥ कलिप्रभावतः प्राप्तसंकरादि
मलीमसान् (कलिप्रभावतः प्राप्तसंकरादिमलीमसान्) एवंभूते सोमवंशे श्रीगुरुदेवेश्वरक्रीडा वर्णिता व्यास एव वंशो

राजोवाच ॥ स्वयामातुषते कूले यदुवंशविभूषणो ॥ क
स्यवंशो भवतृष्णा सोमेनतदा चद्दस्व मे मुने ॥२॥ ॥ ॥रामजी

भावी वर्ण्यते ॥ श्रीकृष्णभक्तिं मुक्त्वा मुक्तैवर्त्मनास्तीति वक्तुं वातेदेवं वैवस्वतमनुवंशे सोमवंशप्रस्तावेन श्री
कृष्णावतारचरितानि सप्रपंचं मनुवर्णितानि ॥ अथेदानीं भाविसोमवंशः कलौ विजातीयसंकरादिमलीमसो
वैराग्यद्वारा श्रीकृष्णैकभक्तिनिगमनायानुव... तितत्र तु सोमवंशशाखा एवानुचित्स्कालानुवर्तितया मागधवंशोनुव
र्ण्यते ॥ तत्र दृष्टो विंशोडयविश्वरोवासुः तस्य ...द्रथः तस्य जरासंधः तस्य सहदेवः ॥ पुत्रोभूदित्युक्तं नवमस्कंधे तत्रैव
सहदेवान्मार्जारिः ॥ ततः श्रुतश्रवादयो रिपुंजयांता विंशतिर्भाविनो राजानो निरूपिताः ॥ तत्र पूर्वमेकवंशसंकरादिदो
षं प्रपंचयति योत्यइति ... रिपुंजय एव पुरंजयः ॥ ... मिनपुरंजयेस्मानिंनजयहत ... पुत्रं प्रद्योतं राजानं कविष्यति

स्यका
श्रुतश्रवा२
धर
6

यस्यपालकोनामसभविष्यति प्रद्योतनः प्रद्योतनसंज्ञाः ॥३॥ नंदोनामकश्चित् महापद्मसंख्यायाः धनस्यपतिर्भविष्यति ॥ अ
तएवमहापद्मइतिअपितस्यनंदस्यापरंनाम ॥८॥ एकछत्रंयस्यांतांपृथिवींशासिष्यति ॥ ततोनंतरमुत्सादनेन्द्रहृतेतःभा

श्रीशुकउवाच ॥ योंत्यःपुरंजयोनामभविष्योबार्हद्रथः ॥ तस्यामात्यस्तुशुनकोहत्वास्वामिनमात्मजं ॥ प्रद्यो
तसंज्ञंराजानंकर्तायत्पालकःसुतः ॥२॥ विशाखयूपःतत्पुत्रोभविताराजकस्ततः ॥ नंदिवर्धनस्तत्पुत्रःपंच
प्रद्योतनाइमे ॥ अष्टत्रिंशोत्तरशतंभोक्ष्यंतिपृथिवींनृपाः ॥३॥ शिशुनागस्ततोभाव्यःकाकवर्णस्तुतत्सुतः
क्षेमधर्मातस्यसुतःक्षेत्रज्ञःक्षेमधर्मजः ॥४॥ विधिसारःसुतस्तस्याजातशत्रुर्भविष्यति ॥ दर्भकस्तत्सुतो
भावीदर्भकस्याजयःस्मृतः ॥५॥ नंदिवर्धनआजेयोमहानंदिःसुतस्ततः ॥ शिशुनागादशैवैतेषष्ट्युत्त
रशतत्रयं ॥६॥ समाभोक्ष्यंतिपृथिवींकुरुश्रेष्ठकलौनृपाः ॥ महानंदिसुतोराजन्शूद्रागर्भोद्भवोबली
महापद्मपतिःकश्चिन्नंदःक्षत्रविनाशकृत ॥ ततोनृपाभविष्यंतिशूद्रप्रायास्त्वधार्मिकाः ॥७॥ सएकछ
त्रांपृथिवीमनुल्लंघितशासनः ॥ शासिष्यतिमहापद्मोद्वितीयइवभार्गवः ॥८॥ तस्यचाष्टौभविष्यंतिसु
माल्यप्रमुखाःसुताः ॥ यइमांभोक्ष्यंतिमहींराजानश्चशतंसमाः ॥९॥ नवनंदान्द्विजःकश्चित्प्रपन्नानुद्धरिष्य
ति ॥ तेषामभावेपृथिवींमौर्याभोक्ष्यंतिवैकलौ ॥१०॥ ॥

र्गवः परशुरामइव ॥८॥ समाःसंवत्सरान् ॥१०॥ नवनंदानंदंचतत्पुत्रांश्चैवनवप्रपन्नान् विश्वस्तान्विख्यातान्वा
द्विजःकौटिल्यवात्स्यायनादिपर्यायःचाणिक्यउद्धरिष्यतिउन्मूलयिष्यति मौर्याः मौर्यसंज्ञाः ॥११॥ ॥ राम

राम ॥ राम ॥ राम

श्री भाग॰ टी॰ २

कथं भोक्ष्यतीति तदाह ॥ स एवेति चंद्रगुप्तं मौर्यं प्रथमं ॥ ३ ॥ तेषां प्रथमो दशरथः पराशरादिभिरुक्तोप्यत्र संधेयः तेन
सह सौर्य दिशा सप्तत्रिंशच्छतोत्तरं समविंशत्युत्तरं शतं समाः ॥ ४ ॥ बृहद्रथस्य सेनापतिः पुष्यमित्रो नाम स्वामिनं ह
त्वा राज्यं करिष्यति सच शुंगानां प्रथमः ततोग्निमित्रादयो नव ॥ इमे वंशं शुंगादशनाधिकं द्वादशाधिकं वर्षशतं

स एव चंद्रगुप्तं वै द्विजो राज्येभिषेक्ष्यति ॥ तत्सुतो वारिसारस्ततस्ततश्चाशोकवर्धनः ॥ १२ ॥ सुयशा भविता त
स्य संगतः सुयशाः सुतः ॥ शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति ॥ १३ ॥ शतधन्वा ततस्तस्य भविता त
द्बृहद्रथः ॥ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं ॥ १४ ॥ समा भोक्ष्यंति पृथिवीं कलौ कुरुकुलोद्वह ।
अग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः ॥ वसुमित्रो भद्रकश्च पुलिंदो भविता ततः ॥ १५ ॥ ततो घोषः
सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ ततो भागवतस्तस्माद्देवभूतिः कुरूद्वह ॥ १६ ॥ शुंगा दशैते भोक्ष्यंति
भूमिं वर्षशताधिकं ॥ ततः कण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप ॥ १७ ॥ शुंगं हत्वा देवभूतिं कण्वो-
मात्यस्तु कामिनं ॥ स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥ १८ ॥ तस्य पुत्रस्तु भूमित्रः तस्य नारायणः
सुतः ॥ कण्वायना इमे भूमिं चत्वारिंशच्च पंच च ॥ शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ युगे ॥ १९ ॥ ह
त्वा कण्वं सुशर्माणं तद्भृत्यो वृषलो बली ॥ गां भोक्ष्यत्यंध्रजातीयः कंचित्कालमसत्तमः ॥ २० ॥

सुशर्मा रक्ष्यायनपति कण्वानां भविता ततः २मूल ध्र।

कथं कण्वा भोक्ष्यंतीति तदाह ॥ परस्त्रीकामिनं देवभूतिनामानं शुंगं हत्वा तदमात्यो वसुदेवनामा कण्वो राज्यं क
रिष्यति ॥ १८ ॥ कण्वायनाश्चत्वारः सुशर्मा इमे चत्वारो वसुदेवादयः कण्वायनाः वर्षाणां त्रीणि शतानि पंच चत्वा
रिंशद्वर्षाणि च भूमिं भोक्ष्यंति ॥ १९ ॥ कण्वानामंतिमं सुशर्माणं हत्वा वलिहिकनामा तद्भृत्यो गां भोक्ष्यति ॥ २०

यत्रयेषुबहुसंख्येषु अष्टसुनवमः शिवस्वातिर्नामाभविता ॥ २४ ॥ आवभृत्याः अवभृतिः नामनगरीतद्राजान ॥ २१ ॥ एते आभी
रादयो मौनव्यतिरिक्ताः पंचषष्टिनृपाः एकोनशतात्रिकं वर्षसहस्रं पृथिवीं भोक्ष्यंति ॥ ततः पूर्वोक्ता एव एकादश मौ

कृष्णनामाथ तद्भ्राता भविता पृथिवीपतिः ॥ श्रीशातकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः ॥ २१ ॥ लंबोदरस्तु
तत्पुत्रः तस्माच्चिबिलको नृपः ॥ मेघस्वातिश्चिबिलकाद् अटमानस्तु तस्य तु ॥ २२ ॥ अनिष्टकर्मा हालेयः
तलकस्तस्य चात्मजः ॥ पुरीषभीरुस्तत्पुत्रः ततो राजा सुनंदनः ॥ २३ ॥ चकोरो बहवो यत्र शिवस्वातिररिं
दम ॥ तस्यापि गोमती पुत्रः पुरीमान्भविता ततः ॥ मेदशिराः शिवस्कंदो यज्ञश्रीस्तत्सुतस्ततः ॥ विजय
स्तत्सुतो भाव्यः चंद्रविज्ञः सलोमधिः ॥ २५ ॥ एते त्रिंशन्नृपतयः चत्वार्यब्दशतानि च ॥ षट्पंचाशच्च पृ
थिवीं भोक्ष्यंति कुरुनंदन ॥ २६ ॥ सप्ताभीरा आवभृत्या दशगर्दभिनो नृपाः ॥ कंकाः षोडश भूपाला भवि
ष्यंति च लोलुपाः ॥ २७ ॥ ततोष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः ॥ भूयो दश गुरुंडाश्च मौना एकादशैव
तु ॥ एते भोक्ष्यंति पृथिवीं दश वर्षशतानि च ॥ नवाधिकां च नवतिं मौना एकादश क्षितिं ॥ २९ ॥ भोक्ष्यं
त्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः ॥ किलिकिलायां नृपतयो भूतनंदोथ वंगिरिः ॥ ३० ॥ शिशुनंदिश्च
तद्भ्राता यशोनंदिः प्रवीरकः ॥ इत्येते वै वर्षशतं भविष्यंत्यधिकानि षट् ॥ ३१ ॥ तेषां त्रयोदश सुता भवि
तारश्च बाह्लिकाः ॥ पुष्पमित्रोथ राजन्यो दुर्मित्रोस्य तथैव च ॥ ३२ ॥ ॥

नाः त्रीणि एव वर्षशतानि विंशति भोक्ष्यंति तैरेवं संस्थितेषु मौनेषु किलिकिलायां नगर्यां नृपतयो भविष्यंती तन्नवैव
नृपाः ॥ ३० ॥ अधिकानि च षड्वर्षाणि ॥ ३१ ॥ तेषां भूतनंदादीनां यथायथं बाह्लिकाः तन्नामानः त्रयोदश सुता भा
विष्यंति ॥ अथ एषु पुष्पमित्रो नाम कोपि राजन्यः अस्य तद्दुर्मित्रो नाम पुत्रः ॥ ३२ ॥ ॥ राम

श्री· भाग· टी· १२

तयाश्चांध्राः कौशलाः वैदूरपतयः विषयाश्च एते तत्तद्देशानां स्वामिः प्रख्याताः तुल्यकालाः खंडमंडलेषु भूपाः ततए
वतेभ्यो बाह्लिकेभ्य एव मागधानां भविष्यति ॥ ३३ ॥ ततश्च मागधानां तु राजा विश्वस्फूर्जिन्नाम भविता सपूर्वोक्तात्पुरंज
यापरः पुरंजयादिति प्रसिद्धः सन् वर्णान्ब्राह्मणादीन् पुलिंदयदुमद्रसंज्ञान् म्लेच्छप्रायान् करिष्यति अपरानिति पाठे
अन्यान् पुलिंदादिसंज्ञान् वर्णान् करिष्यतीत्यर्थः ॥ ३४ ॥ सच एवं कृत्वा अब्रह्मण्यभूयिष्ठाः नरान् कृत्वा ॥ अथवा ब्रह्म वेदं वे

२२

एककाला इमे भूपाः सप्तांध्राः सप्त कौशलाः ॥ वैदूरपतयो भाव्या नैषधास्तत एव हि ॥ ३३ ॥ मागधानां तु
भविता विश्वस्फूर्जिः पुरंजयः ॥ करिष्यत्यपरो वर्णान्पुलिंदयदुमद्रकान् ॥ ३४ ॥ प्रजाश्चाब्रह्मभूयि
ष्ठाः स्थापयिष्यति दुर्मतिः ॥ वीर्यवान्क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ ३५ ॥ अनुगंगामाप्रयागं गुप्तां भो
क्ष्यति मेदिनीं ॥ ३६ ॥ सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः ॥ व्रात्या द्विजा भविष्यंति शूद्रप्राया जना
धिपाः ॥ ३७ ॥ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं ॥ भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्च
सः ॥ ३८ ॥ तुल्यकाला इमे राजन्म्लेच्छप्रायाश्च भूभृतः ॥ एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥ ३९

दशाह्नितं अब्रह्मवर्चसप्रचुराः सतीः प्रजाः स्थापयिष्यति पालयिष्यति ॥ सच पद्मावत्यां पुरि अनुगंगां ॥ गंगाद्वारमा
रभ्य प्रयागपर्यंतं गुप्तां रक्षितां पालितां मेदिनीं भोक्ष्यति ॥ ३५ ॥ तदनंतरं च सौराष्ट्रादिदेशवर्तिनो द्विजा व्रात्या उ
पनयनरहिता भविष्यंति अब्रह्मवर्चसः वेदाचारशून्याः ॥ ३६ ॥ इमे च म्लेच्छप्राया भूभृतः तुल्यकाला भविष्यंति ॥
किंच एते सर्वे अधर्मानृतपराः अधर्मे ॥ अनृते च परिनिष्ठिताः फल्गुदाः अल्पदातारः ॥ ३७ ॥ ॥ राम ॥

असंस्कृता गर्भाधानादिसंस्काररहिताः प्रजा भक्षयिष्यंति यज्ञाद्यपहारादिना पीडयिष्यंति ॥४०॥ किंच तन्नाथाः ते भूपाः तासां प्रजानां नाथाः तन्नाथाः ते नाथाः येषां ते जनपदाः देशवर्तिनो मनुष्याः तच्छीलाचारवादिनः तेषामेव शीलमाचारो वादाश्च नदंतः ४१ इति श्रीभावार्थदीपिकायां द्वादशस्कंधे प्रथमोऽध्यायः ॥१॥ द्वितीये तु क

स्त्रीबालगोद्विजघ्नाश्च परदारधनाहृताः ॥ उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः ॥३९॥ असंस्कृताः क्रियाहीना रजसा तमसावृताः ॥ प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ॥४०॥ उदितास्तमितप्राया हर्षशोकादिविह्वलाः ॥४१॥ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ॥ अन्योन्यतो राजभिश्च क्षयं यास्यंति पीडिताः ॥४२॥ इति श्रीभागवते द्वादशस्कंधे प्रथमोऽध्यायः ॥१॥ श्रीशुक उवाच ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया ॥ कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः ॥१॥ वित्तमेव कलौ नॄणां जन्माचारगुणोदयः ॥ धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥२॥ दांपत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके ॥ स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ॥३॥

लेर्दोषवृद्धौ कल्क्यवतारः ततः ॥ अथ धर्मे हते जने नष्टे पुनः कृतयुगागमः कलिधर्मान्प्रपंचयति ततश्चेत्यादिना ॥२॥ दांपत्ये पतिभावे अभिरुचिरेव हेतुः ॥ न कुलशीलादिभिः व्यावहारिके क्रयविक्रयादौ ॥ स्त्रीत्वे पुंस्त्वे च तयोः श्रेष्ठे रतिकौशलमेव हेतुः न कुलं आचारो न वा ॥३॥ ॥

श्री॰ भाग॰ टी॰ ५

आश्रमाणां ख्यातौ ज्ञाने लिंगं एव दंडाजिनादिकं हेतुः॥ न त्वाचारविशेषः अन्योन्यापत्तिकारणं च॥ आश्रमादाश्रमांत
रगमो ऽपि च कारणं यद्वा बहूदकहंसादीनां अन्योन्यापत्तौ नमस्कारादिव्यवहारो कारणं॥ अत्र आसुद्रापणादिदानास
मर्थ्ये निस्वायदौर्बल्यं पराजेयः चापलं वचः बहुभाषणं॥४॥ आसाधुत्वे चौर्याद्यभियोगे ग्रहे मकाकीनिस्पृह एव तत्।
स्वाचत्वं करोति साधुत्वे दंभ एव उद्वाहे विवाहे स्वीकारः तत्र स्नानं तृष्टिः स्नानमेव प्रसाधनमलंकारः न तु योगस्ना

लिंगमेवाश्रमख्यातौ च अन्योन्यापत्तिकारणं॥ अवृत्त्यान्यायदौर्बल्यं पांडित्ये चापलं वचः॥४॥ अनन्यैते छ्या।
वासाधुत्वे साधुत्वे दंभ एव तु॥ स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनं॥५॥ दूरे वार्ययनं तीर्थं लावण्यं
केशधारणं उदरंभरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि॥६॥ दाक्ष्यं कुटुंबभरणं यशोऽर्थे धर्मसेवनं
एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले॥७॥ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता न्रृपः॥ प्रजा हि लु
ब्धै राजन्यैर्निर्हृतार्थाः स्तु यत्सिभिः॥८॥ आछिन्नदारद्रविणा यास्यंति गिरिकाननं॥ शाकमूलामिष
क्षौद्रफलपुष्पादिभोजनाः॥९॥ अनावृष्ट्या च नंक्ष्यंति दुर्भिक्षकरपीडिताः॥ शीतवातातपप्रावृट्हि-
मैरन्योन्यतः प्रजाः॥१०॥ दुःखैस्तथा व्याधिभिश्चैव संतापेन च चिंतया॥ त्रिंशद्विंशतिवर्षाणि परमायुः
कलौ नृणां॥ ११॥ नीयमानेषु देहेषु देहिनां कलिदोषतः॥ वर्णाश्रमवतां धर्मे न ष्टे वेदपथे नृणां

१२

नं॥५॥ दूरे वर्तमाने वारितत्त्वअयनं न तु योगस्नानं॥ जलाशय स्तीर्थं न तु गयादि॥ लावण्यं केशेषु धार्यमाणे
षु एष स्त्रीयो भवेति॥ उदरंभरता स्वार्थः पुरुषार्थ॥ न तु भिन्न वे भिलादास्याति॥ सत्यत्वे मतिधार्ष्ट्यमेव मैख्या।
र्यमेव न तु प्रकाशेन॥७॥ आछिन्नाः अपहृतादाराद्रविणानि येषां ते ताः॥ अष्टिवीजं॥९॥ नीयमाणोष्वित्यादिनाद।

दस्युप्रायेषु चौरतुल्येषु चौर्यानृतवृथाहिंसाद्याः नानावृत्तयो येषु तेषु ॥१३॥ छागप्रायास्वप्रमाणतः क्षीरतश्च अल्पासु स्थास्नुषु वृक्षेषु विद्युत्प्रायेषु न त्विद्वत्कुलेषु शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु जनेषु खरधर्मिषु । णिदुःसहवेदिष्विति कलौ गतप्राये समाप्तप्राये ॥१६॥ एतत्प्रपञ्चयति चराचरगुरोः श्रीमदीश्वरस्य धर्मत्राणहेतोः गुरुत्वेश्वरत्वयोः उपपादनं अखिलस्य विश्वस्यात्मनः कारणमस्तीति एवंभूतस्य हरेर्जन्म साधूनां धर्मत्रा ।

पाषंडप्रचुरे धर्मे दस्युप्रायेषु राजसु ॥ चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु ॥१३॥ शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु ॥ गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु ॥१४॥ अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु ॥ विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु ॥१५॥ इत्थं कलौ गतप्राये जनेषु खरधर्मिषु ॥ धर्मत्राणाय सत्त्वेन भगवानवतरिष्यति ॥१६॥ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणाय साधूनां जन्म कर्मापनुत्तये ॥१७॥ शंभलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥१८॥ अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः ॥ असिनासाधुदमनमष्टैश्वर्यगुणान्वितः ॥१९॥ विचरन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः ॥ नृपलिङ्गच्छदो दस्यून्कोटिशो निहनिष्यति ॥ २० ॥

णाय प्रयोजनमाह कर्मापनुत्तये मोक्षाय ॥१७॥ शंभलग्रामे मुख्यस्य प्रधानस्य यथानाम्ना विष्णुयशसः ब्राह्मणस्य भवने गृहे अजो भविष्यति ॥ न जातस्त्वर्थः ॥१८॥ धर्मत्राणप्रकारमाह ॥ अखिलमिति ॥ असाद्वेदर्भं तु येन जन्मप्रमातस्य ॥ अस्य नाद स्यून्कोटिशो निहनिष्यतीत्युक्तेनान्वयः ॥ असाधुदमन इति पावेक कल्कि विशेष

नं४

१४

तस्य पंचः आशुनाशीघ्रगामिना हयेन नदर्तोऽप्रतिमद्युतिरिति विचरन् अप्रतिमाद्युतिः इत्यस्ति तथाप्यगस्त्यसंकलादयः —
वत्वतः नृपलिंगच्छदः राजवेषाच्छन्नान् दस्यूनिति पूर्वस्य टीका ॥२०॥ ततः च पुनः कृतयुगप्रवृत्तिं वक्तुमाह ॥ अथेति सा
र्धभ्यां तेषां — पौरजानपदानां मनांसि विशदानि भविष्यंतीत्यन्वयः श्रीवासुदेवस्य कल्केः अंगरागाणि चंदनादीनि तैः
पुण्यगंधो योऽनिलः तं स्पृशन्तीति तथा तेषां ॥२१॥ स्थविष्ठः स्थूलः ॥२२॥ कृतयुगप्रवृत्तिमाह यदावतीर्ण इति प्रजानां
सूतिः ॥२३॥ तदेव तारकलोपलक्षणमाह ॥ यदा चंद्रश्चेति तिष्यः पुष्यो नाम नक्षत्रं अयमर्थः चंद्रसूर्यबृहस्प
तीनां यदा पुष्यनक्षत्रे योगः तदा तत्क्षणे कृतयुगं भविष्यतीति यद्यपि च शतेषु द्वादशवर्षेषु कर्कराशौ बृहस्पतौ वर्त

अथ तेषां भविष्यंति मनांसि विशदानि वै ॥ वासुदेवांगरागातिपुण्यगंधानिलस्पृशां ॥२१॥ पौरजानपदा
नां वै हतेष्वखिलदस्युषु ॥ तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति ॥२२॥ वासुदेवे भगवति सत्वमू
र्तौ हृदि स्थिते ॥२२॥ यदावतीर्णो भगवान् कल्किर्धर्मपतिर्हरिः ॥ कृतं भविष्यति तदा प्रजासूतिश्च सात्विकी
यदा चंद्रश्च सूर्यश्च तथा तिष्यबृहस्पती ॥ एकराशौ समेष्यंति तदा भवति तत्कृतं ॥२४॥ येऽतीता वर्तमा
ना ये भविष्यंति च पार्थिवाः ॥ ते त उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः ॥२५॥ आरभ्य भवतो जन्म याव
न्नंदाभिषेचनं ॥ एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं ॥२६॥

माने द्विरात्रस्य मावस्यास्तु तेषां त्रयाणाम् अपि पुष्ययोगः संभविष्यति तथापि सहस्रवेशो तु विवक्षितः संभाविताति
ववनादेनानातिप्रसंगः ॥२४॥ एवं नवमस्कंधमारभ्य अनुक्रांतेषु वैवस्वतमन्वंशोद्भवेषु निगमयति ॥ येऽतीता इ
ति उद्देशतः संक्षेपतः ॥२५॥ कलियुगावसानविशेषं वक्तुमाह ॥ आरभ्येत्यादिना वर्षसहस्रं पंचदशोत्तरशत
मिति कथापि द्विवत्यांतरसंख्येयं वक्ततः परंतत्र दशाधिकं तरं द्वाभ्यां न्यूनं तु वर्षाणां सार्धसहस्रं भवति यतः
परीक्षितः समकालमागधे मार्जारिमारभ्य विंशतिर्युक्तयोनाः द्विंशाती राजानः सहस्रसंवत्सरं भोक्ष्यंतीति नवमस्कं
धे येवाह — तृणाला भाव्याः सहस्रसंवत्सरमिति ततः परं च प्रद्योतनाद्याः पंच विंशाततो शिशुनागाः षष्ठ्युत्तरशत

कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह सप्तर्षीणां त्विति त्रयस्यार्थः प्रागग्रशकटाकारं तारास
प्तकं सप्तर्षिमंडलं तत्र किंचिदुन्नते तेषामग्रस्थानीयो मरीचिस्ततः पश्चादानम्रकंधराकारो वसिष्ठः सभार्यः ततः
पश्चादीषदुन्नते तेषां मूलस्थानीयेऽङ्गिराः ततः पश्चाच्चतुरस्रमाकारचतुष्कं ईशाने ॥२७॥ ततो दक्षिणतः पुल
स्त्यः पुलस्त्यात्पश्चिमतः पुलहः ततः उत्तरतः क्रतुः एवं स्थितेन तेषां मध्ये यौ पूर्वौ उदयसमये पूर्व
मुदितौ पुलहक्रतू तेषां तयोस्तु मध्ये तयोश्च पूर्वयोश्च मध्ये यत्समं दक्षिणतः समदेशावस्थितं ॥ अ
श्विन्यादिषु नक्षत्रेषु यत्समं नक्षत्रं दृश्यते तेन नक्षत्रेण युक्ता नृणां मानुषेण शतं तिष्ठन्ति ते च द्विजाः त्वदीये यु

सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि ॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥२७॥ तेनैते ऋष
यो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ॥ ते त्वदीये द्विजाः काले अधुना चाश्रिता मघाः ॥२८॥ विष्णोर्भगवतो
भानुः कृष्णाख्योऽसौ दिवं गतः ॥ तदाविशत्कलिर्लोकं पापे यद्रमते जनः ॥२९॥ यावत्स पादपद्मा
भ्यां स्पृशन्नास्ते रमापतिः ॥ तावत्कलिर्वै पृथिवीं पराक्रान्तुं न चाशकत् ॥३०॥ यदा देवर्षयः सप्त म
घासु विचरन्ति हि ॥ तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥३१॥

ना मघाश्रिता वर्तन्ते ॥२८॥ तेषु मघासु वर्तमानेषु सत्सु यदा विष्णोर्भगवतः भानुः कृष्णसंज्ञकस्त्वत्को
देहः दिवं वैकुंठं गतः तदा कलियुगमविशत् ॥ यस्मिन्युगे जनः पापे रमते इति कलियुगस्य लक्षणं ॥२९
ननु श्रीकृष्णे पृथिव्यां वर्तमानेपि संध्यानुरूपेण कलिः प्रविष्ट एवासीत् ॥ सत्यं तथापि तावत्तस्य पराक्रमो नासी
दित्यभिप्रायः इत्याह यावदिति पराक्रान्तुमभिभवितुं ॥३०॥ प्रतीयमानोक्त एव कलिप्रवेशकाल इत्याह ॥ यदा दे
वर्षय इति द्वादशाब्दशतात्मक इति दिव्येन मानेन संध्यासंध्यांशसहिताद्वादशाब्दशतात्मकः सकलिः तदा सं
ध्यामतिक्रम्य प्रविष्ट इत्यर्थः ॥३१॥ ॥

श्री भा० स्कं० टी० ९

कलेः प्रवेशकालमुक्त्वा तस्य कलेर्वृद्धिकालमाह यदेति तदा प्रद्योतनात्प्रभृति वृद्धिं राज्ञन् नंदात्प्रभृति वृद्धिंग
मिष्यति ॥३२॥ ननु यदा कलेर्निर्गमः पलक्षणं तदैव प्रविष्ट इति ॥ उक्तं ततः पूर्वमेव प्रवेशः ततः परं वृद्धिरित्यत्र ।
किं प्रमाणं तत्राह यस्मिन्निति प्रतिपन्नं प्रविष्टमिति ज्ञात्वा पुराविदः पूर्वस्मज्ञानारः ॥३३॥ कलेरंतं तेन कृतयुगप्रवे
शमाह दिव्याब्दानामिति चतुर्थे कलौ प्रवेशानां तृपरिमितेनान्तेनापि सहस्रान्ते सत्यां संध्यांशैः कृतयुगप्रवेश इति

यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः ॥ तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥३२॥ यस्मिन् कृ-
ष्णो दिवं यातः तस्मिन्नेव तदाहनि ॥ प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ॥३३॥ दिव्याब्दानां सहस्रां-
ते चतुर्थे तु पुनः कृते ॥ भविष्यति यदा नृणां मन आत्मप्रकाशकं ॥३४॥ इत्येष मानवो वंशो यथा सं-
ख्यायते भुवि ॥ तथा विट्शूद्रविप्राणां तास्ता ज्ञेया युगे युगे ॥३५॥ एतेषां नामलिंगानां पुरुषाणां
महात्मनां ॥ कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥३६॥ देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वा-
कुवंशजः ॥ कलापग्राम आसाते महायोगबलान्वितौ ॥३७॥ ॥

क्रमाह यदा नृणां मनः आत्मप्रकाशकं भविष्यति तदेति ॥३४॥ राजवंशोक्तिं स्थितिं ब्राह्मणादिवंशे-
ष्वयाति दिशन्नाह इत्येष इति यथाभिसंख्यनीचावस्थाभिः तास्ताश्चावस्थाः युगे इति वचनात् ॥३५॥ एतत्की-
र्तनस्यैव राज्ञि पुत्रादयोऽपि स्योपयोगितामाह ॥ एतेषामिति नामैव लिंगं ज्ञापकं येषां कथामात्रेणावशिष्टा-
नां कीर्तिरेव स्थिता न तु राज्यपुत्रादयो वा ॥३६॥ कालानुरूपेनान्तरा राजवंशादीनां पुनः प्रवृत्तिप्रकारमाह देवापिः
सोमवंशजः मरुश्च सूर्यवंशजः कलापग्रामे नाम योगिनामावासः प्रसिद्धः ॥३७॥ ॥

16

इममेव प्रकारं प्रतिचतुर्युगं प्रदर्शयति कृतमिति ॥ ३९ ॥ एतेषां नामलिंगानामभिमानादिप्रयुक्तं प्रपंचयति राजन्निति पं-
चभिः ॥ ४० ॥ समस्तं कृतेत्यनेन सूचितं ॥ भूतद्रोहं निंदयति कृमीति राजनाम्नः राजेति नाम यस्य तस्यापि दे-
हस्यांते कृमिविड्भस्मेति वा संज्ञा भविष्यति तत्कृते तदर्थं यो भूतध्रुक् ॥ भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद जानाति इत्यपेक्षा-

ताविहैत्य कलेरंते वासुदेवानुशिक्षितौ ॥ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ॥ ३८ ॥ कृतं त्रेता द्वाप-
रं च कलिश्चेति चतुर्युगं ॥ अनेन क्रमयोगेन भुवि प्राणिषु वर्तते ॥ ३९ ॥ राजन्नेते मया प्रोक्ता नरदेवाः
तथापरे ॥ भूमौ ममत्वं कृत्वांते हित्वेमां निधनं गताः ॥ ४० ॥ कृमिविड्भस्मसंज्ञांते राजनाम्नोपि यस्य
च ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ ४१ ॥ कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता ॥ मत्पुत्र-
स्य च पौत्रस्य मत्पूर्वा वंशजस्य च ॥ ४२ ॥ तेजोवन्नमयं कायं गृहीत्वात्मतयाबुधः ॥ महीं ममतया चोभौ
हित्वांते दर्शनं गताः ॥ ४३ ॥ ये ये भूपतयो राजन् भुंजते भुवमोजसा ॥ कालेन ते कृताः सर्वे कथामात्राः
कथासु च ॥ ४४ ॥ इति श्रीभागवते द्वादशस्कंधे द्वितीयोध्यायः ॥ २ ॥ ॥

२४

यां हेतुत्वेन भूतद्रोहं विधिना हि यतो भूतद्रोहान्निरयो भवतीति ॥ ४१ ॥ ममत्वप्रकारं प्रपंचयति ॥ कथमिति सेय-
मखंडा भूः मे पूर्वजैः पुरुषैः धृता सती इदानीं मत्पूर्वा च सती मत्पुत्रादेः कथं स्यादित्येवं ॥ ४२ ॥ उभौ मही कायं च ॥
अदर्शनमस्तं ॥ ४३ ॥ उपसंहरति ये येति ॥ इति ते सर्वे च कथासु क्रियमाणासु कथामात्राः कृताः ४४ इति श्री-
भावार्थदीपिकायां द्वादशस्कंधे द्वितीयोध्यायः ॥ २ ॥ ॥

श्रीभा०टी०

तृतीये भूमिगीतेषु राजदोषादि वर्ण्यते ॥ कलौ बहुदोषयुक्ते हे दोषदृष्टी हरेः स्तुतिः देहे हंता भूमौ च ममतां कुर्वीत ।
तो वक्ष्या इत्युक्तं न देव भूमिगीतैः प्रपंचयति हृष्यादिना आत्मनि दृष्ट्या जयेष्यां ग्राम्यं नन्दपत्रकानन्दासप्रकारमा
हृ अहो इति ॥ १ ॥ फेनकामेन फेनोपमे पिंडदेहे विश्वासं मितां विषयासं नीतां येषां नरेन्द्राणां स एव कामो मोहः एव
स्यात् २ काममेव दर्शयति हा स्याद्वर्गमिति इंद्रियार्थलंपट स्य न राज्य प्राप्तिः स्यात् ॥ इति प्रथमं मिंद्रियषड्

श्रीशुक उवाच ॥ दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसति भूरियं ॥ अहो मां विजिगीषंति मृत्योः क्रीडनकान्नृ
पाः ॥ १ ॥ काम एष नरेंद्राणां मोघः स्याद्विदुषामपि ॥ येन फेनोपमे पिंडे येऽतिविस्रंभिता नृपाः ॥ २ ॥ पूर्वं नि
र्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः ॥ ततः सचिवपौराप्तकरींद्रानस्य कंटकान् ॥ ३ ॥ एवं क्रमेण जेष्या
मः पृथ्वीं सागरमेखलां ॥ इत्याशाबद्धहृदया न पश्यंत्यंतिकेऽन्तकं ॥ ४ ॥ समुद्रावरणां जित्वा मां वि
शंत्यब्धिमोजसा ॥ कियदात्मजयस्यैतन्मुक्तिरात्मजये फलं ॥ ५ ॥ यां विसृज्यैव मनवस्तत्सुताश्च कु
रूद्वह ॥ गता यथागतं युद्धे तां मां जेष्यंत्यबुद्धयः ॥ ६ ॥ मत्कृते पितृपुत्राणां भ्रातृणां चापि विग्रहः ॥ जायते
ह्यसतां राज्ये ममताबद्धचेतसां ॥ ७ ॥ ममेवेयं मही कृत्स्ना न ते मूढेति वादिनः ॥ स्पर्धमाना मिथो घ्नंति म्रियंते मत्कृते नृपाः ॥ ८ ॥

दुर्गं निर्जित्य राजमंत्रिणो जेष्यामः वशीकरिष्यामः सचिवाश्च मात्याः करींद्राः हस्तिपाः तांश्च जेष्यामः कंटका
न् प्रतिपक्षान् ॥ अस्माच्च पास्य अथ कंटकानिति वा पाठः ॥ ३ ॥ एवं केचिदाशाबद्धहृदयाः ॥ ४ ॥ एवं के चित्पुनर्मां जि
त्वाप्यतितृष्णया अब्धिं विशंति ॥ तदेव सिंहृदय जयेनैव राज्यं साधयितुमिच्छंति ते तेषां सदा इत्याह कियदिति ॥ अंते अ
तः केन पर्यवसानं ॥ ५ ॥ तदेवाह यामिति कुरूद्वह हे ति भूमिगीतं कथयन् श्रीशुकर्षिः संबोधयति कुलोद्वह इति व

रम्यो नाम कश्चिद्राजा यद्वा लोकदृष्ट्या दशरथवदेव निर्दिष्टः ॥ ९ ॥ लोकं रावयति रोदयतीति लोकरावणः ॥ ११ ॥ मयि इद
मिदं मम ता कृत्वा ये वर्तन्ते ते कालेन कथावशेषाः कृताः विभो इति संबोधनेन ज्ञातृहेतित्वत् ॥ १३ ॥ राजवंशानुकथनस्य
तात्पर्यमाह कथा इमा इति विज्ञानवैराग्ययोः सारतां ज्ञानं ततो वैराग्यं तयोर्विवक्षया परेयुषां मृतानां वचोविभूतीः

ते॰

ममैवेयं मही कृत्स्ना न ते मूढा इति वादिनः । स्पर्धमाना मिथो घ्नन्ति म्रियन्ते मत्कृते नृपाः ॥ ८ ॥ पृथुः पुरूरवा
गाधिर्नहुषो भरतोऽर्जुनः । मांधाता सगरो रामः खट्वांगो धुंधुहा रघुः ॥ ९ ॥ तृणबिंदुर्ययातिश्च शर्या
तिः शंतनुर्गयः । भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः ॥ १० ॥ हिरण्यकशिपुर्वृत्रो रावणो लो
करावणः । नमुचिः शंबरो भौमो हिरण्याक्षोऽथ तारकः ॥ ११ ॥ अन्ये च बहवो दैत्या राजानो ये महेश्वराः । स
र्वे सर्वविदः शूराः सर्वे सर्वजितोऽजिताः ॥ १२ ॥ ममतां मय्यवर्तन्त कृत्वोच्चैर्मर्त्यधर्मिणः । कथावशेषाः का
लेन ह्यकृतार्थाः कृता विभो ॥ १३ ॥ कथा इमास्ते कथिता महीयसां वितायलोकेषु यशः परेयुषां ।
विज्ञानवैराग्यविवक्षया विभो वचोविभूतीर्न तु पारमार्थ्यं ॥ १४ ॥ यस्तूत्तमश्लोकगुणानुवादः संगीय
तेऽभीक्ष्णममंगलघ्नः । तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥ १५ ॥ राजोवाच
केनोपायेन भगवन्कलेर्दोषान्कलौ जनाः । विधमिष्यंत्युपचितांस्तन्मे ब्रूहि यथा मुने ॥ १६ ॥

वाग्विभूतीः समाप्ताः नृपाः परमार्थ्यं परमार्थः पुरुषार्थं कथनेन भवतीत्यर्थः ॥ १४ ॥ कस्तर्हि पुरुषार्थस्तत्राह गुणानुवादः यः परमा
र्थः तं नमाह यस्त्विति नित्यं श्रवणे हेतुः अभीक्ष्णं अभीप्सितां ॥ १५ ॥ कलिदोषोपचये सति भक्तेरसंभवं मन्यमानः पृच्छति के
नोपायेनेति विधमिष्यन्ति नाशयिष्यन्ति यथायथावत् ॥ १६ ॥ ॥ ॥ राम

कलियुगोक्तः परो धर्म इति तु अभावाप्रकृतितु मुत्सयाप्रकृतितु गुणानीतिसूक्ष्मीमनुबंधः आमंत्रिकजिज्ञासयापुनः प्र
कृतिप्रलयकल्पयोः सद्भावस्थितिकालयोः नवायंबहिस्त्रोतः प्रश्नइत्याह कालस्येति ॥१७॥ तत्रतत्रयुगयाधर्मस्ता।
वदाह कृतइतिजज्ञेतेस्तत्कालीनैर्जनैः दानस्याबाद्दे घतयाश्च भयदानंतदेवअथमस्कंधेशौचशाहूनोक्तंविभो
संपूर्णस्यधर्मस्य ॥१८॥ तदानीसनजनानाहसंतुष्टाइतिमैत्राःभूतमैत्रीयुक्ताः अमणाश्चात्मान्यासवंतः ॥१९॥ च

युगानियुगयधर्मोऽस्मानंप्रलयकल्पयोः॥ कालस्येश्वररूपस्यवातिंविद्धिमहात्मनः॥१७॥ श्रीशुकः
कृतेप्रवर्ततेधर्मः चतुष्पात्तज्जनैर्धृतः॥ सत्यंदयातपोदानमितिपादाविभोर्नृप॥१८॥ संतुष्टाःकरु
णामैत्राः शांतादांतास्तितिक्षवः॥ आत्मारामाःसमदृशः प्रायशःश्रमणाजनाः॥१९॥ त्रेतायांध
र्मपादानांतुर्यांशोहीयतेशनैः॥ अधर्मपादैरनृतहिंसासंतोषविग्रहैः॥२०॥ तदाक्रियातपोनिष्ठा
नातिहिंस्रानलंपटाः॥ त्रैवर्गिकास्त्रयीवृद्धावर्णाब्रह्मोत्तरानृप॥२१॥ तपःसत्यदयादानेष्वर्धंह्र
सतिद्वापरे॥ हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः॥२२॥ यशस्विनोमहाशीलाः स्वाध्याया
ध्ययनेरताः॥ आढ्याःकुटुंबिनोहृष्टावर्णाःक्षत्रद्विजोत्तराः॥२३॥ कलौतुधर्महेतूनांतुर्यां
शोऽधर्महेतुभिः॥ एधमानैःक्षीयमाणोह्यंतेसोपिविनंक्ष्यति॥२४॥ ॥ ॥ ॥

ब्रह्मोत्तराब्राह्मणाधिकाः॥२१॥ अनृतेनसत्यंहिंसायादयाअसंतोषेणतपःविग्रहेणदानमितियथासंख्यंज्ञे
यं॥ हिंसातुष्ट्यनृतद्वेषैरितियंक्रमोनविवक्षितः॥ धर्मस्याधर्मसतिक्षीयतेअधर्मस्यलक्षणैःचिह्नैःपादैरि
त्यर्थः॥२२॥ यशस्विनःकीर्तिप्रियाःक्षत्रद्विजोत्तराःक्षत्रियब्राह्मणप्रधानाः॥२३॥ कलौधर्मपादानांतुर्यांशश्च

शूद्रदासोत्तराः शूद्रा एव वर्णादिषु प्रधानाः ॥२५॥ युगानामेवंभूतवैषम्यकारणमाह ॥ सत्त्वमिति पंचभिः ॥२६॥ मनोबु
द्धींद्रियाणि च सत्त्वे यदा प्रभवंति अतिशयेन वर्तंते ॥२७॥ यदा कर्मादिषु भक्तिः प्रीतिः तदा रजोवृत्तिप्रधानं त्रेता
युगं जानीहि ॥२८॥ काम्यानां कर्मणां विषये यदा प्रीतिः तदा रजस्तमः प्रधानं द्वापरं जानीहि ॥२९॥ विषाद
नं दुःखं ॥३०॥ कलिदोषान् प्रपंचयति यस्मादिमाना ॥ यस्मात्कले हेतोः क्षुद्रदृशः मंदमतयः क्षुद्रभाग्याः म

तस्मिं लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः ॥ दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः ॥२५॥ सत्त्वं र
जस्तम इति दृश्यंते पुरुषे गुणाः ॥ कालसंचोदिताः ते वै परिवर्तंत आत्मनि ॥२६॥ प्रभवंति यदा सत्त्वे
मनोबुद्धींद्रियाणि च ॥ तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः ॥२७॥ यदा कर्मसु काम्येषु भक्तिर्य
शसि देहिनां ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ॥२८॥ यदा लोभस्त्वसंतोषो मानो दंभोथ
मत्सरः ॥ कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः ॥२९॥ यदा मायानृतं तंद्रा निद्रा हिंसा विषाद
नं ॥ शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः ॥३०॥ यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाश
नाः ॥ कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोसतीः ॥३१॥ दस्यूत्कृष्टा जनपदा वेदाः पाषंडदूषिताः
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥३२॥ अव्रता बटवोशौचा भिक्षवश्च कुटुंबिनः तपस्वि
नो ग्रामवासा न्यासिनो त्यर्थलोलुपाः ॥३३॥ ॥

हाशनाः बह्वाहाराः वित्तहीना अपि कामिनः स्वैरिण्यः पुंश्चल्यः असतीः असत्यः ॥३१॥ दस्यवउत्कृष्टाः प्रचुर्ये
ण येषु ते ॥३२॥ अव्रताः विहिताचारशून्याः अशौचाः शौचरहिताः बटवो ब्रह्मचारिणो भविष्यंति कुटुंबिनश्च श
श्वस्याः स्वयं भिक्षाटनपराः भविष्यंति तपस्विनो वनस्थाः वनं हित्वा ग्रामवासा भविष्यंतीत्या।

पुनरपि स्त्रीणां स्वभावमाह क्षुद्रस्वकाया इति कटुकभाषिण्य इति अप्रियभाषिण्यः अप्रियवादिन्यः चौर्यं च माया कपटं उरु साहसं यासां ताः ॥ ३४ ॥ किंच किराटाः वणिजः पणायिष्यंति किंच सर्वे जनाः अनापदि अपि जुगुप्सितां वार्तां वृत्तिं साधु मंस्यंते ॥ ३५ ॥ सर्वैरिति समं अपि पतिं द्रव्यहीनं भृत्याः त्यक्ष्यंति पतयो भृत्यं विपन्नं गवादिभिर्दोग्ध्या। कौलं कुलपरंपरायातमपि त्यक्ष्यंति अपयस्विनीः अपयोदोहाः ॥ ३६ ॥ सौरतं सुरतनिमित्तं सौहृदं येषां ते ॥

क्षुद्रस्वकाया महाहारा भूरिभाग्या गतह्रियः ॥ शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ॥ ३४ ॥ पणायिष्यन्ति वै क्षुद्राः किराटाः कूटकारिणः ॥ अनापद्यपि मंस्यन्ते वार्तां साधु जुगुप्सिताम् ॥ ३५ ॥ पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् ॥ भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ॥ ३६ ॥ पितृभ्रातृसुहृज्ज्ञातीन्हित्वा सौरतसौहृदाः ॥ ननान्दृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥ ३७ ॥ शूद्राः प्रतिग्रहीष्यन्ति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यन्त्यधर्मज्ञा अधिरुह्योत्तमासनम् ॥ ३८ ॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ ३९ ॥ वासोन्नपानशयनव्यवायस्नानभूषणैः ॥ हीनाः पिशाचसंदर्शा भविष्यन्ति कलौ प्रजाः ॥ ४० ॥ कलौ काकिणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यंति च प्रियान्प्राणान्हनिष्यंति स्वकानपि ॥ ४१ ॥ न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि ॥ पुत्रान्सर्वार्थकुशलान्क्षुद्राः शिश्नोदरंभराः ॥ ४२ ॥ कलौ न राजन्जगतां परं गुरुं त्रिलोकनाथानतपाद

अत एव ननांदा रोज भार्याभगिन्यः स्याला भार्याभ्रातरः तैः संवादो मंत्रालोचनं येषां ते ननंदृ इति पाठः ॥ ३७ ॥ पिशाचसंदर्शाः पिशाचसदृशाः काकिणिकं विंशतिवराटिकामात्रेप्यर्थे विषयभूते विगृह्य वैरं कृत्वा ॥ ४१ ॥ महांतमनर्थमाह द्वाभ्यां कलाविति त्रिलोकनाथैरवनतं नमस्कृतं पादपद्मं यस्य तं नेयक्ष्यंति न याजयिष्यंति याश्च

श्री भाग० टी० ९

वैनसः ॥ ४३ ॥

॥ ४४ ॥ ... ॥ ४४ ॥ २२

विवशो गृणन्सन् विमुक्ताः कर्मरूपाः अर्गलाः प्रतिबन्धा यस्य सः ॥४४॥ तदेवं कलिदोषान्प्रपंच्य नीत्वा प्रसक्तं ततो निस्तारो
पायमाह पुंसामिति षड्भिः द्रव्यदेशात्मभिः संभवो येषां तान् चित्तस्थः चिन्तितः ॥४५॥ अयमेवोपायो नान्य इति दृ
ष्टान्तमाह यथेति धातुजं ताम्रादिसंश्लेषजातं दुर्वर्णं मलिनत्वं भावं मालिन्यं तत्रस्थितो वह्निर्यथा हरति न तोया

यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान् ॥ विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति
यक्ष्यंति न तं कलौ जनाः ॥४४॥ पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् ॥ सर्वान्हरति चित्तस्थो
भगवान्पुरुषोत्तमः ॥४५॥ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपि वा ॥ नृणां धुनोति भगवान्हृत्स्थो
जन्मायुताशुभं ॥४६॥ यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हंति धातुजं ॥ एवमात्मगतो विष्णुर्योगिनामशुभा
शयं ॥४७॥ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः ॥ नात्यंतशुद्धिं लभतेंतरात्मा यथा
हृदिस्थे भगवत्यनंते ॥४८॥ तस्मात्सर्वात्मना राजन्हृदिस्थं कुरु केशवं ॥ म्रियमाणो ह्यवहितः ततो
यासि परां गतिं ॥४९॥ म्रियमाणैरभिध्येयो भगवान्परमेश्वरः ॥ आत्मभावं नयत्यंग सर्वात्मा सर्वसंश्र
यः ॥५०॥ कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः ॥ कीर्तनादेव कृष्णस्य मुक्तसंगः परं व्रजेत् ॥५१॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥५२॥ इति श्रीभा
गवते द्वादशस्कंधे तृतीयोध्यायः ॥३॥ ॥

दि ॥ एवं योगिनामपि विष्णुरेव न तु योगादिकमित्यर्थः ॥४७॥ एतदेव विवृणोति विद्येति विद्या आद्यैर्देवतोपासना ॥
आत्मभावं स्वस्वरूपं ॥५०॥ इदानीं कलिं स्तौति द्वाभ्यां कलेर्दोषनिधे राजन्निति ॥५१॥ तत्सर्वं हरिकीर्तनादेव क
लौ भवति ॥५२॥ इति श्रीद्वादशे तृतीयः ॥ चतुर्थे तु चतुर्धा कालयानैमित्तिकादयः ॥ तत्र संसारनिस्तारो हरिकी

कलिदोषनिवर्तकं हरिसंकीर्तनादिकं ॥ स एव परमो धर्मः कलाविति प्रपञ्च्यते ॥ तत्रैकं यथा नत्महं प्रलयक
ल्पयो मनि ब्रह्मी लितनदिदानीं तत्रीय संयोऽक कालानुवादपूर्वकं वर्वकीतिन पयति काल इति स कालः परमाण्वे
मुक्तेपूर्वमाण्वे तामिस्यादिना कालः कथितः चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं ॥ संख्यातानि सहस्राणि द्वि
गुणानि शतानि चेति युगमानं च कथितं ॥ १॥ तत्रैक कल्पमानमाह ॥ चतुर्युगेति यत्र चतुर्दश मनवः क्रमेण भवंति
तत्र कल्पमानमाह ॥ चतुर्युगेति यत्र चतुर्दश मनवः क्रमेण भवंति ॥ २॥ प्रलयस्तु चतुर्विधः नैमित्तिकः प्राकृति
क आत्यंतिको नित्यश्चेति ॥ तत्र नैमित्तिकप्रलयमानमाह ॥ तदंत इति ब्राह्मी तावान् चतुर्युग सहस्रप्रमा।

श्रीशुक उवाच ॥ कालस्ते परमाण्वादिर्द्विपरार्धावधिर्नृप ॥ कथितो युगमानं च शृणु कल्पलयावपि ॥ १॥ चतु
र्युगसहस्रं च ब्रह्मणो दिनमुच्यते ॥ स कल्पो यत्र मनवश्चतुर्दश विशांपते ॥ २॥ तदंते प्रलयस्तावान् ब्राह्मी
रात्रिरुदाहृता ॥ त्रयो लोका इमे तत्र कल्पंते प्रलयाय हि ॥ ३॥ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्व
सृक् शेतेऽनंतासनो विश्वमात्मसात्कृत्य चात्मभूः ॥ ४॥ द्विपरार्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः ॥ तदा
प्रकृतयः सप्त कल्पंते प्रलयाय वै ॥ ५॥ एष प्राकृतिको राजन्प्रलयो यत्र लीयते ॥ अंडकोशस्तु संघातो
विघात उपसादिते ॥ ६॥ पर्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति ॥ तदा निरन्ने ह्यन्योन्यं भक्ष्यमाणाः क्षुधार्दि

णः सैव ब्राह्मी रात्रिः ॥ ३॥ नैमित्तिकत्वं दर्शयति यत्र यदा विश्वसृक् श्रीनारायणः विश्वमात्मसात्कृत्य स्वस्मिन्नुप
संहृत्य शेते आत्मभूर्ब्रह्मा च तस्मिन् शेते तयोरभेदविवक्षया वा ब्रह्मण एवानंतासनत्वमुक्तं ब्रह्मणो निद्रां नि
मित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः ॥ ४॥ प्राकृतिकं प्रलयमाह द्वाभ्यां द्विपरार्धे त्विति ब्रह्म
णः आयुषि महदहंकारपंचतन्मात्राणि ॥ ५॥ संघातः महदादिकार्यभूतः प्रकृतीनां तत्कार्यत्वस्याऽण्डस्य च लया
त्प्राकृतिक इत्यर्थः विघाते कारणे उपसादिते सति ॥ ६॥ तदेवाह पर्जन्य इत्यादिना त्रुटी डियादि द्वयेनो मर्थाःप्रा

श्री० भाग० टी० २९

अंशांशः सात्यवतस्यांशः स एव तस्य कलया अंशेनावतीर्णः चतुर्विधमेवाह ऋगिति ऋगादिमंत्राणां राशीन्वर्गशः तत्प्रकरणभेदेनोद्धृत्य यथानेकविधमणिराशेः मणिगणाः पद्मरागादयो विविच्य उद्ध्रियंते तद्वदुद्धृत्य ते मंत्रैस्ततः ऋगादिसंहिताश्चक्रे ॥५०॥ तासां संहितानां मध्ये एकैकां ॥५१॥ बह्वृचा ऋचो यद्भूरिणो बह्वृचाख्या नितरां प्र

पराशरात्सत्यवत्यामंशांशकलया विभुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधं ॥४९॥ ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ॥ चतस्रः संहिताश्चक्रे मंत्रैर्मणिगणा इव ॥५०॥ तासां स चतुरः शिष्यान् उपाहूय महामुनिः ॥ एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥५१॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ॥ वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणं ॥५२॥ साम्नां जैमिनये प्राह तथा छंदोगसंहितां अथर्वांगिरसीं नाम स्वशिष्याय सुमंतवे ॥५३॥ पैलः स्वसंहितामूचे इंद्रप्रमितये मुनिः ॥ बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकां ॥५४॥ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ॥ पराशरायाग्निमित्रे इंद्रप्रमितिरात्मवान् ॥५५॥ अध्यापयत्संहितां स्वां मांडूकेयमृषिं कविं ॥ तस्य शिष्यो देवमित्रः सौभर्यादिभ्य ऊचिवान् ॥५६॥

अप्रगीयमानत्वान्निगदाख्यं ॥५२॥ छंदस्सु गीयमानत्वात् ॥ छंदोगाख्यां संहितां ॥५३॥ तत्र ऋच एवादौ शाखाविभागमाह पैल इति ॥ स्वसंहितां द्विधा विभज्य इंद्रप्रमितये बाष्कलाय ऊचे ॥५४॥ स बाष्कलोपि स्वसंहितां चतुर्धा व्यस्य बोध्यादिभ्यः चतुर्भ्यः शिष्येभ्य आह हे भार्गव ॥५५॥ इंद्रप्रमितिरपि स्वां संहितां स्वतं मांडूकेयमध्यापयामास तस्य मांडूकेयस्य शिष्यो देवमित्रः ॥५६॥ ॥

२९

इदानीं ततः सर्वेषां पंचोमन्त्रिप्रकारमाह ॥ तस्माद्धीति त्रयः विसर्गत्वायुक्ताभावाः पैरकारोकारमकारैः यार्थंतितन्का
रणान्वातन्नाने वाह ॥ गुणाः सत्वादयः नाम्नानिकृष्यज्ञः सामानि ऋग्यर्जुर्भूर्भुवःस्वर्लोकाः ब्रह्मयोजाग्रदाद्या ॥ ५२
ततस्तेभ्यो वर्णेभ्यः अन्तवाणां समाभावं समाहारं तमेवाह ॥ अंतःस्थाः यरलवाः ऊष्माणः शषसहाः स्वरास्त्र।
कारादयाः स्पर्शाः कादयः कुस्वादीनाश्वमादिशब्दान् जिह्वामूलीयादयः तेष्वेव लतानां स्वरूपं यस्मात् ॥ ५३ ॥
विभुः चतुर्मुखस्तद्रूपो भगवान् ॥ असृजदिति पूर्वस्मै वानुषंगः चात हैत्रविवक्षया वर्णान् दोहयेपलति ताक्ष्य।

तस्य स्यास्य संस्पयो वर्णा अकारादया भूगृहह ॥ यार्थेते ये ह्ययो भावा गुणा नाम पर्यन्तय ॥ ५४ ॥ ततो नरस
मान्मास्य समसृजद्भगवानजः ॥ अन्तस्थोष्मस्वरस्पर्शान्दीर्घादिलक्षणं ॥ ५५ ॥ तेनासौ चतुरो वेदान्सृष्टवान्वि
वेदैर्विभुः ॥ सर्वास्ति काम्यौकाराद्यानदीर्घविवक्षया ॥ ५५ ॥ प्रत्यक्षं यो यत्नात् स्वरूपस्य धीन्नुस्थको वि
दान् ॥ तेनत्यमेपिदेष्टाः स्वपुत्रेभ्यः समादिष्टान् ॥ ५६ ॥ तेपरस्पराध्याश्च मामस्तवद्धिष्ठेयः पूर्नितत्रतेः ॥ चत
र्युगेषु धवलाद्वापरादेो महर्षिभिः ॥ ५७ ॥ क्षीणायुषः क्षीणसत्वानुर्मेधानवीनकालगः ॥ वेदान्ब्रह्म
र्षयो व्यस्यन्दृष्ट्वा कृतनैदिनाः ॥ ५८ ॥ ग्रन्थिनृपांतवेदसंभवा वालोकभावनः ॥ ब्रह्मेशाद्यैर्लोक।
पालैर्यो विनीयमेत्रुमये ॥ ५८ ॥ ॥२

त्विजः चतुर्होतारः तैरत्र हेयं होत्राध्वर्यवादिकं कर्म यान्तर्हीयं तद्विवक्षया ॥ ५४ ॥ प्रत्यानसरीच्यादीनूलानवेदा
न्ब्रह्मणो विदान्वेदोच्चारणादिति पुराणान् ॥ ५५ ॥ एवं चतुर्युगे पुराणमाः द्वापरमादिः यस्मात दंलक्षणास्यका
लस्यतस्मिन्द्वापरांते वेदविभागप्रसिद्धेः शांतसमकाल व्यासावतारप्रसिद्धेश्च पत्नाविभक्ता ॥ ५६ ॥ तत्र हेतुः
क्षीणायुषः ज्ञेनानं तर्हि पुरुषत्रुद्विप्रभवत्वात् ॥ ग्रनादृश्यपी यस्मात् इमाग्रंथाकाहहृदिस्थिति ॥ ५७ ॥ एवं सामा
न्यतो वेदविभागक्रमस्य कावैवस्वतमन्वंतरे विशेषमाविरूपयितुमाह ॥ ग्रस्मिन्नपीति ॥ ५८ ॥ ॥ राम ॥

पर

२८

श्रीभाग० टी० ८

27

प्रसंगात्प्राप्तो दोषः समकालं मोक्षफलं साह यदुपासनयेत्यादि उपासनया आत्मनो मलं धूत्वा अपोह्य कथंभूतं मलं तमाह ॥ द्रव्यम
यिभूतं क्रिया अध्यात्मं कारकं अधिदैवं एवं त्रिधाभूतं अपुनर्भवं यांति तद्यातं ॥ ३८ ॥ विहृतं निमानः केवलीशादि मिः उच्चा
र्यमाणो सो कारवस्यान्तर समाप्तायां तत्र भवति ॥ सूक्ष्मतया नेदिति निवृ ॥ अव्यक्तः प्रभवो यस्य सः तदेवाह स्वराट्
स्वत एव राजते इति व्युत्पत्त्या माननः तस्मैव कार्यमालंबते ॥ यन्नदितिनु प्रेसवा वलिंगशाह विशेषणात्वात् लिंगा
त्मकं ॥ ३९ ॥ कोसौ परमात्मा तत्र नमाह शृणोति ॥ इमं स्फोट मध्ये मंत्रकारान्ते जीव एवं नं शृणोति नेत्याह सम श्रो।
त्रकर्णी पिधानादिना दिना अप्रवृत्तिके पिधानादिना ॥ अप्रवृत्तिके पिधाने सति जीवस्तत्कारणार्थीनज्ञानत्वात्

यद्रूपासनया ब्रह्मयोगिनो मलमात्मनः ॥ द्रव्यक्रियाकारकाख्यं धूत्वा यांत्यपुनर्भवं ॥ ३८ ॥ ततोभूत्त्रिवृ
दोंकारो योव्यक्तप्रभवः स्वराट् ॥ यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥ शृणोति य इमं स्फोटं
सुप्तश्रोत्रे च शून्यदृक् ॥ येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥ ४० ॥ स्वधाम्नो ब्रह्मणः साक्षाद्वाच
कः परमात्मनः ॥ स सर्वमंत्रोपनिषद्वेदबीजं सनातनं ॥ ४१ ॥ ॥

न्या२

ननु तदा श्रोतातदुपलब्धिस्तत्तस्य परमात्मत्वात् द्विविधैवेति भावः इष्टं वस्तुनैवं यतः सुप्तस्य शून्यदृशोऽपीन्द्रियवर्गे हृष्टा
नेयस्य तस्याहिस्ति मोयदा श्राहृष्कत्वाप्रबुध्यते न सदा जीवः श्रोता विलीनेंद्रियत्वात् अतोयः तदा श्राहृष्कत्वाजीवं ॥ प्रबो
धयति सयच्चापरमात्मैवतद्व्रतको सौ ओंकारः नेविशिनष्टि साधनैर्येन वाग्व्यज्यते यस्य च हृदाकाशे आत्मनः ॥ स्वधा
म्नात्व्यक्तिरभिव्यक्तिः ॥ ४० ॥ किंच स्वधाम्नः स्वस्याश्रयः कारणाय ब्रह्मस्तस्य किंच परमात्मभूतस्य समस्त देवताया वाचकोऽपी
त्यशायेनाह स इति सर्वमंत्राणामुपनिषद्रहस्य स्तत्स्वरूपमित्यर्थः तत्र हेतुः वेदानां बीजं कारणं बीजत्वेपि अविकारिता।

यतस्तद्वैष्णवं पदमामनंतीत्याह ॥ परमिति यदेतत्तद्वैष्णवं पदं स्वरूपमामनंति केचन तत्र आत्मत्वप्रतीतिं तं उत्सिसृक्षवः सत्कामिक्षवः यतः अनन्यसौहृदाः नास्ति अन्यस्मिन्सौहृदं येषां ते अतो दौरात्म्यं देहाद्यहंभावं विसृज्य देहे अहंकाराभावादन्यत्रैसौहृदं नास्ति अतएवोत्सिसृक्षवः इत्यर्थः कथं नेति नेतीत्येवं अतद्विवेकेन तत्सर्वमपि असत्यायसि हृदोपगूह्य ध्यानादिना ततः समाहितैरवसितं निश्चितं यच्छास्त्रावसितमवगतं ॥ आत्मतया गृहीतमित्यर्थः ॥ ३२

परं पदं वैष्णवमामनंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगूह्यावसितं समाहितैः ॥ ३२ ॥ त एतदधिगच्छंति विष्णोर्यत्परमं पदं ॥ अहं ममेति दौर्जन्यं न येषां देहगेहजं ॥ ३३ ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित ॥ ३४ ॥ ॐ नमो भगवते तस्मै कृष्णायाकुंठमेधसे ॥ यत्पादांबुरुहध्यानात्संहितामध्यगामिमां ॥ ३५ ॥ शौनक उवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदाश्च कथिता व्यस्ता एतत्सौम्याभिधेहि नः ॥ ३६ ॥ सूत उवाच समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ ३७ ॥ ॥

एवं प्रासंगिकं शिष्याय गुरोरुपदर्शयति ॥ एतदिति देहजमहंममेति ॥ गेहजं ममेति ॥ ३३ ॥ प्राप्त उपायमाह अतिवादानिति ॥ ३४ ॥ स्वस्य कृतार्थतां गुरुप्रणाममतिनमस्कृति कृष्णाय व्यासाय ॥ अध्यगां अस्थिरगतवानस्मि ॥ ३५ ॥ इमां संहितामध्यगामिति श्रुतेन पुराणसंहिताविभागं विज्ञाय वेदविभागाभिप्रायं पृच्छति पैलादिभिरिति द्वाभ्याम् ॥ ३६ ॥ तत्र प्रथमं वेदाविर्भावप्रकारमाह ॥ समाहितात्मन इति सूक्ष्मः हृद्याकाशः तस्मान्नादोऽभूत् यः कर्णपुटप्रयाने श्रोत्रवृत्तिनिरोधाद्विभाव्यते ॥ ३७ ॥ ॥

३५

कथं तर्हि मायातत्कर्मनिवृत्तिरित्याशंक्य श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भावनातः सर्वानर्थनिवृत्तिरिति शा-
स्त्रार्थमुपसंहरति नयत्रेति पंचभिः दर्भीति मायाकटवालनयपुमानिमेवंभूतायां ब्रह्मावसरे कुत्र लिखमाना-
यामायेत्यर्थः॥ सा आत्मावादे क्रियमाणे॥ आत्मवादिभिर्यत्राभयानविराजितानप्रकाशिता॥ किंत भीते
वस्तु कार्यमोहादिकमनुरूपं लोकं यत्र विवर्तत इति॥ प्रतिपादितेत्यर्थः॥ तत्त्वं॥ तस्मै नमो भगवते वासुदेवा-
य धीमहि॥ यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं विलज्जमानया यस्य स्थातुमीक्षापथेमुया॥ विमोहि-

सृज्यं २

नयत्र दंभीरभयाविराजिता मायात्मवादेसकृदात्मवादिभिः॥ नयद्विवादो विविधस्तदाश्रयो
मनश्च संकल्पविकल्पवृत्तियत्॥ ३०॥ नयत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहं
तदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत्तत्स्वयं मुनिः॥ ३१

ताविकत्थंते ममाहमिति दुर्धिय इति॥ किंच यत्र यस्मात्तदाश्रयो मायाश्रयो विविधो विवादोपि नास्ति वि-
शेषविषयत्वाद्विवादानां तस्य च विशेषातीतत्वादिति भावः संकल्पविकल्पवृत्तियस्य तन्मनोपि यत्र नास्ति
संकल्पविकल्पानामपि विशेषविषयत्वात्॥ ३०॥ किंच सृज्यं कर्म सृजत्कारकं वर्गाणि सहउभयोः सृज्यसृष्टोः
परं साध्यं श्रेयः फलमपि सृज्यसृष्टफलैरन्वितो जीवश्चाहंकाराख्यः कोपि यत्र नास्ति अत एवोत्सादितौ निरस्तौ बा-
ध्यबाधकौ यस्मिंस्तदेव तत्स्वयं आत्मस्वरूपमित्यर्थः तत्र स्मिन्नूर्मीनृत्तरंगानहंकारादीनिषिध्य विर-

कथमयमः स्वदुःखप्रदातानास्ति सर्पादीनामुपलभ्यमानत्वादितिचेत्तत्राह ॥ सर्पादिनाजंतुः पंचत्वं मृत्युमृ
च्छति प्राप्नोतीतियत् ॥ तदावृद्धकर्मैव पूर्वकृतस्वकर्मप्रयुक्ताएवं सर्पादयो न स्वतंत्रा इति भावः ॥ २५ ॥ सेत्स्यीयते ।
समाप्यतां ॥ आभिचारिकं हिंसाफलं दृष्टं प्राचीनकर्म यतः सर्पान्दष्टुंप्रयुक्तस्य तत्वात्स्यं नापराधइतिभा
वः वाक्यतिं हृदयस्पर्शि ॥ २८ ॥ ननु कथं विरुद्धाभ्यामेवं संमोहः यतः अस्मकोपानवीक्षितो मया तुर्जनमेजयको

सर्पचौराग्निविषद्यूतमृत्युरथ्यादिभिर्नृप ॥ पंचत्वमृच्छते जंतुर्भुंक्ते प्रारब्धकर्मतत् ॥ २५ ॥ तस्मा
त्त्वमपि देवराजन्नष्ट्रशांतो येनाभिचारिकं ॥ सर्पाश्च नागाः सोदरयाजनैर्दृष्टं हि प्रजायते ॥ २७ ॥ इत्युक्तः सत
पौत्रः मह सहर्षेर्मानयन्वचः ॥ सर्पसत्रादुपरतः पूजयामास वाक्पतिं ॥ २८ ॥ सेष्टा वितीर्णा महामा
यालतागायया ॥ सुहृदां च सौ वाल्यमूता भूतेषु गुणवाहृन्तिमिः ॥ २९ ॥

बाध्य

पाल्सर्पाणामित्यादि तत्राह सैषेति तथा महत्त्वे दर्शयति अलक्ताणान लक्ष्यते ॥ इयलक्तागाअप्रतर्क्या ।
सर्पः अस्मैकेमतंत्राह ययायास्य श्रीविष्णोरेव आत्मभूताः आत्मा याभूमाः प्राणिनः गुणवृत्तिभिः क्रो
धादिभिः भूतेषु देहेषु सुहृत्संनिवाप्यवायकमाः व्रजंतीसर्पः ॥ नत्वश्रवणादिना बाधितयातयाकृतो ।
मोहः स्यात्तत्राह ॥ अबाधया बाधितत्वमशाक्यया ॥ २९ ॥ ॥ राम ॥

30

प्रासंगिकमाह ॥ जनमेजय इत्यादि ॥ सर्पाभिचारसत्रे द्विजैः सह वर्तमानः यथावदाजुहावेति वा ॥ सर्वाबाहने का
रणमाह सज्ञजुह्वइति ॥ १९ ॥ कस्मान्न तक्षकोनदह्येत इत्युक्ताः संतो द्विजा ऊचुः तन्निमित्ति ॥ १९ ॥ ऋत्विजः प्रतिप्राह महे
इ इंद्र सोद्विजः किमितिनपात्यते ॥ २० ॥ राज्ञोवाच अतो अज्ञुः साद्वेषमाहानंद यंयति ॥ तक्षकेति इन्द्रा गुप्तो

द्विजा ऊचुः ३

जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितं ॥ यथाजुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः ॥ १६ ॥ सर्पसत्रे स
मिद्धाग्नौ दह्यमानान्महोरगान् ॥ दृष्ट्वेंद्रं भयसंविग्नः तक्षकः शरणं ययौ ॥ १७ ॥ अपश्यंस्तक्षकं तत्र रा
जा पारीक्षितो द्विजान् ॥ उवाच तक्षकः कस्मान्न दह्येतोरगाधमः ॥ १८ ॥ तं गोपायति राजेंद्र शक्रः शर
णमागतं ॥ तेन संस्तंभितः सर्पः तस्मान्नाग्नौ पतत्यसौ ॥ १९ ॥ पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः
सहेंद्रः तक्षको विप्रा नाग्नौ किमिति पात्यतां ॥ २० ॥ तच्छ्रुत्वाजुहुवुर्विप्राः सहेंद्रं तक्षकं मखे ॥ तक्षका
शु पतस्वेह सहेंद्रेण मरुत्वता ॥ २१ ॥ इति ब्रह्मोदिताक्षेपैः स्थानादिंद्रः प्रचालितः ॥ बभूव संभ्रान्त
मतिः सविमानः सतक्षकः ॥ २२ ॥ तं पतंतं विमानेन सह तक्षकमंबरात् ॥ विलोक्यांगिरसः प्राह राजा
नं तं बृहस्पतिः ॥ २३ ॥ नैष त्वया मनुष्येंद्र वधमर्हति सर्पराट् ॥ अनेन पीतममृतं तस्मादयमजरामरः ॥ २४ ॥
जीवितं मरणं जंतोर्गतिः स्वेनैव कर्मणा ॥ राजंस्ततोऽन्यो नान्यस्य प्रदाता सुखदुःखयोः ॥ २५ ॥ राम

आशु पतस्व मरुत्वाना मरुद्गणावता इंद्रेण सह ॥ २१ ॥ ब्रह्मणो कैर्वाक्यैः पतस्व वाक्यैः सतक्षकः ॥ २२ ॥ भवता
नामाजरामरः तथापि पिपीलिकादिवत् कंदत्वामीति चेत्तत्राह ॥ जीवितमिति ॥ गतिः परलोकः अतो दुर्मरणानि
मित्तापि दुर्गतिरनेन हतेन तव पितुर्नशंकनीयमित्यर्थः ॥ २५ ॥ राम

ननु किं प्राणायामयोगेन किं चिरकालं ज्ञाननिष्ठो भवेतिचेत्तत्राह॥ अज्ञानं चेति चकारात्तत्संस्कारा गृह्यन्ते तच्च तत्त्वपर्ये वेयत्राह
भवतेति॥७॥ आत्मनात्मत्वया आत्मानं मनः आत्मनि प्रत्यक्षकाशे समाधाय आपरमानंदैकाग्र्यं सदा सः लीनप्रा
णाः निश्चेष्टोऽसौ यथा तरुः स्थाणुः॥८॥ तमेवं विधिं निर्विष्टं पुष्पाकुले भागे बर्हिर्विदमे॥९॥ तदेवं ब्रह्मभूते तस्मि
न्नति काममनादिकं पि हृष्टपेषणमिवाभवदिति दर्शयति तेन तत्का इति त्रिभिः हे विप्राः॥११॥ तं विधं चिकित्सया।

अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया॥ भवतादर्शितं तेऽमं परं भगवतः पदं॥७॥ सूत उवाच इत्यु
क्तः तमनुज्ञाप्य भगवान्वादरायणिः॥ जगाम भिक्षुभिः साकं नरदेवेन पूजितः॥८॥ परीक्षिदपि
राजर्षिरात्मन्यात्मानमात्मना॥ समाधाय परं दध्यावस्पंदासुर्यथा तरुः॥९॥ प्राक्कूले बर्हिष्यासी
नो गंगाकूले उदङ्मुखः॥ ब्रह्मभूतो महायोगी निःसंगश्छिन्नसंशयः॥१०॥ तक्षकः प्रहितो विप्राः क्रु
द्धेन द्विजसूनुना॥ हंतुकामो नृपं गच्छन्ददर्श पथि कश्यपं॥११॥ तं तर्पयित्वा द्रविणैर्निवर्त्य
विषहारिणं॥ द्विजरूपप्रतिच्छन्नः कामरूपोऽदशन्नृपं॥१२॥ ब्रह्मभूतस्य राजर्षेर्देहोऽहिगरलाग्निना॥ २४
बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनां॥१३॥ हाहाकारो महानासीद्भुवि खे दिक्षु सर्वतः॥ विस्मि
ता ह्यभवन्सर्वे देवासुरनरादयः॥१४॥ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः॥ ववृषुः पुष्पवर्षाणि
विबुधाः साधुवादिनः॥१५॥

परीक्षिदिति ततो नदव्याजेनायाः गरुडं तं तक्षकाल लीढवद्वृन्दतस्य ब्रह्मभूतस्य पुनरंकुरादिकं मेणोत्थापनादि
महाविघ्नं लदयेत्तिनः इ द्रविणैर्धनैः संतर्पिततो निर्वर्त्य द्विजरूपेणातिरोहितः सन्नदशत्॥१२॥ तच्चपुत्र
हन्त्मिव जातेश्मा हब्रह्मभूतस्येति॥१३॥ तच्चलतां सर्वेषां शः एवं ततः परं तत्सर्वमाह द्वाभ्यां हाहाकार इ

श्रीहरेः चेष्टामात्मत्वेयत्पृष्टवानुतदेवृत्तंतेकथितंशिष्यस्यकृतार्थतायरीक्षायाथपृष्टइतिकिमिति ॥ २ ॥ इतिश्रीभा वार्थेद्वादशस्कंधेपंचमः ॥ ५ ॥ षष्ठेपरीक्षितोमोक्षः सर्पदष्टोमहिर्नैवृतः । वेदशाखाविभागोत्रवेदव्यासवर्णा नपूर्वतत्श्रीमत्श्रीभागवतंनामपुराणंनिशम्यनिखिलात्मसाक्षिहरिंपश्यतिनिविलंबात्मनिपश्यतीतितथाते नश्रुतः समनन्तेनतत्रैवनतेनमूर्ध्नातत्पादलग्नपरस्यजानतश्चरोशिवसितिधायेमयर्द्धः ॥ २ ॥ सिद्धः कृतार्थोस्मियतः

एतत्तेकथितंतातयथात्मापृष्टवान्नृप ॥ हरेर्विश्वात्मनश्चेष्टांकिंभूयःश्रोतुमिच्छसि ॥ ३ ॥ इतिश्रीभागवते द्वादशस्कंधेपंचमोध्यायः ॥ ५ ॥ सूतउवाच ॥ एतन्निशम्यमुनिनाभिहितंपरीक्षिद्व्यासात्मजेननिखिलात्म दृशासमेन ॥ तत्पादमूलमुपसृत्यनतेनमूर्ध्नाबद्धांजलिस्तमिदमाहसविष्णुरातः ॥ १ ॥ श्रीराजोवाच ॥ सि द्धोस्म्यनुगृहीतोस्मिभवताकरुणात्मना ॥ श्रावितोयच्चमेसाक्षादनादिनिधनोहरिः ॥ २ ॥ नात्यद्भुतम हंमन्येमहतामच्युतात्मनां ॥ अज्ञेषुतापतप्तेषुभूतेषुयदनुग्रहः ॥ ३ ॥ पुराणसंहितामेतामश्रौष्मभ वतोवयं ॥ यस्यांखलूत्तमश्लोकोभगवाननुवर्ण्यते ॥ ४ ॥ भगवंस्तक्षकादिभ्योमृत्युभ्योनबिभेम्य हं ॥ प्रविष्टोब्रह्मनिर्वाणमभयंदर्शितंत्वया ॥ ५ ॥ अनुजानीहिमांब्रह्मन्वाचंयच्छाम्यधोक्षजे ॥ मुक्त कामाशयंचेतःप्रवेश्यविसृजाम्यसून् ॥ ६ ॥ ॥

अनुगृहीतोस्मिअनुग्रहमेवाह ॥ यच्चसाक्षात् ॥ श्रावितस्वशाखानामितिसाधनंच ॥ २ ॥ अश्रौष्मश्रुतवंतःभवंतःस काशात् ॥ ४ ॥ सिद्धोस्मीत्युक्तंनदेवाविष्करोतिहेभगवन्इतियतस्त्वयादर्शितंब्रह्मप्रविष्टः कथंभूतमभयंयतो निर्वाणंकैवल्यरूपं ॥ ५ ॥ किंभूयःश्रोतुमिच्छसीतियदुक्तंतत्रसिद्धोहंनकिंचित्श्रोतुमिच्छामिकेवलमनुजा नीहीतिवाचंयच्छामिउपलक्षणंसर्वेंद्रियाणांवाचंनियम्यकिंकरिष्यसितदाहमुक्ताःकामाशयायस्माद्वासनायेनतत् चेतः ॥ अधोक्षजेप्रवेश्यअसून्विसृजामि ॥ ६ ॥ ॥ राम ॥ ॥

एतदेव सदृष्टांतमाह सार्धेन स्नेहेनेति दीपस्य ज्योतिर्यो दीपत्वं ज्वालारूपः परिणामः तत्र तैलस्थानीयं कर्म तदा-
धिष्ठानस्थानीयं मनः वर्तिस्थानीयो देहः अग्निसंयोगस्थानीया आभासाहीपस्थानीयः संसारः इति योजना देहकृतः
देहनिबंधनः सर्वो देहकृतो मनसो न चात्मनः ॥७॥ अतो दीपवत्संसार एव नश्यति न त्वात्मा ज्योतिर्विदित्याह नेति
न त्वनत्र प्रतीयमान आत्मा ज्ञात इत्यत आह ॥ यद्वा इति व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोः परः अव्ययः यतः स्वयंज्यो-
तिः परतत्प्रपंचयति ॥ आकाश इवेति आकाशो देहादिः प्रपंचसमूहो निर्विकारः नाशं तदुपमा च यस्य सोऽनंतो-
पमः ततो विभुः ॥८॥ अतस्तमेव चिंतयेत्याह एवमिति आत्मस्वदेहाद्युपाधिस्थितं आत्मस्वभावि चारयन् उत्तमान

स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ॥ ततो दीपस्य दीपत्वमेवं देहकृतो भवः ॥७॥ रजःसत्त्वतमो-
वृत्त्या जायतेऽथ विनश्यति ॥७॥ न तत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परः ॥ आकाश इव चाधारो ध्रुवोऽनं-
तोपमस्ततः ॥८॥ एवमात्मानमात्मस्थमात्मनैवामृश प्रभो ॥ बुद्ध्यानुमानगर्भिण्या वासुदेवानुचिंत-
या ॥९॥ चोदितो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः ॥ मृत्यवो नोपधक्ष्यंति मृत्यूनां मृत्युमीश्वरं ॥१०॥ अहं
ब्रह्म परं धाम ब्रह्माहं परमं पदं ॥ एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले ॥११॥ दशंतं तक्षकं पादे
लेलिहानं विषाननैः ॥ न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः ॥१२॥

गर्भिण्या तर्कयुक्तया अन्वयव्यतिरेकयुक्तया ॥९॥ एवं च सति तक्षकोऽदंदहेत इत्याह चोदित इति तत्र हेतवः
स्तत्सर्व इति स्तुहेतवः ॥१०॥ विमर्शप्रकारं प्रदर्शयन् तत्कादर्शनं दर्शयति ॥ द्वाभ्यां श्लोकाभ्यां योऽहं स ब्रह्मैव ब्रह्मै-
वाहमिति समीक्ष्य नन्वहं ब्रह्मेति भावनया ब्रह्मस्वरूपो कादि निष्टत्ति ॥ ब्रह्माह क्षितिभावनयाच
ब्रह्मणः परोक्षनिवृत्तिर्भवति इति च व्यवहारादर्शिनः निष्कले निरुपाधौ आत्मनि ब्रह्मणि ॥११॥ विषयुक्तेराननैः
दशंतं ग्रसंतं तक्षकं लेलिहानं सर्पं च ह्याले लिहानं जिह्वाभिरोष्ठप्रान्ते सृक्किणी आस्वादयंतं आत्मनः पृथक् ॥१२

न तु बीजांकुरवत् त्वस्मात्पुत्ररूपेणात्स्वयमेव भवतीति यथाह श्रुतिः ततः पुनर्नवं अङ्गाद्बीजमिव पौत्रादिरूपेणापि
त्वयमेव भवसि पिता पुत्रेणापि स्त्र आत्मा नियानाविति अतनो त्वसुप त्वमकथं न त्वमसीति वेत तत्राह न भ
विष्यसि इति भूत्वा पुत्रपौत्रादिरूपवान्बीजांकुरवन्न भविष्यसि॥ यस्माद्देहादेः व्यतिरिक्तस्त्वं यथानलः॥
काष्ठात् तद्देहाद् जायते नात्मेति भावः॥३॥ जन्मादीनां देहधर्मत्वं दृष्टान्तेन प्रपंचयति स्वप्ने यथात्मनः शिरः
छेदं स्वयं पश्यति॥ एवं जागरणेपि यस्माद्देहस्य पंचत्वादिकं पश्यति ततस्तद्द्रष्टृत्वादात्मन इदं असममात्रे वस्तु।

न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान्॥ बीजांकुरवद्देहादेर्व्यतिरिक्तो यथानलः॥३॥ स्वप्ने य
था शिरःछेदं पंचत्वाद्यात्मनः स्वयं॥ यस्मात् पश्यति देहस्य तत आत्मा ह्यजोमरः॥४॥ घटे भिन्ने य
थाकाश आकाशः स्याद्यथा पुरा॥ एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः॥५॥ मनः सृजति वै
देहान् गुणान् कर्माणि चात्मनः॥ तन्मनः सृजते माया ततो जीवस्य संसृतिः॥६॥ ॥ ॥ राम॥

तः वात्मजो मरत्वे सद्धेयमर्थः॥ तदुक्तं आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ न भवाप्ययवस्तुमोमभिज्ञो द्व
यलक्षणः इति॥४॥ तस्माद्देहोपाधिकोयमात्मनो जन्मादिसंसारभ्रमः तस्मादुपाधिनिवृत्तौ मुच्यत इति
सदृष्टान्तमाह घटे इति॥ यथा पुरा घटोपाधेः पूर्वमिव पुनर्घटे भिन्ने तदन्तर्वर्ति घटाकाश आकाश एव
स्याद्यथा॥ एवं देहे मृते तत्त्वज्ञानेन लीने सतीति॥५॥ ज्ञानेन लये संभावितं मायाकृतमात्मनो देहाद्युपाधि
संबंधप्रकारमाह॥ मन आत्मनो देहादीन् सृजति॥ तच्च मनो माया॥ सृजति ततो मायायां उपाधिसमुदायात्

श्रोतृवादरदैर्व्योयसंप्रदायप्रवृत्तिमाह पुराणसंहितामिति त्रिभिः ॥४०॥ स वै बादरायणः प्रीतः सन् इमां संहितां प्राहेति पूर्वेणान्वयः ॥४१॥ असौ सूत इति प्रवक्तः स्थितिं निर्दिशाह ॥ नैमिषालये नैमिषारण्यस्थाने ४२ इति श्रीभावार्थदीपिकायां द्वादशस्कंधे चतुर्थोऽध्यायः ॥४॥ पंचमे तु समासेन परब्रह्मोपदेशतः राज्ञस्तक्षकसंदेशान्मृत्युभीतिनिवारणं। एवं तु पुराणोक्तमृत्युभयं प्राप्नोतीत्यमिश्रीनपुराणार्थमनुस्मारयति अत्रेति अर्थे।

पुराणसंहितामेतामृषिर्नारायणोऽव्ययः। नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ॥४०॥ स वै मह्यं महाराज भगवान्बादरायणः ॥ इमां भागवतीं प्रीतः संहितां वेदसम्मितां ॥४१॥ एतां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिषालये ॥ दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः ॥४२॥ इति श्रीभागवते द्वादशस्कंधे परमार्थनिरूपणं नाम चतुर्थोऽध्यायः ॥४॥ श्रीशुक उवाच ॥ अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान्हरिः ॥ यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥१॥ त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि ॥ न जातः प्रागभूतोऽद्य देहवत्त्वं न नंक्ष्यसि ॥२॥ ॥

भावः जातः कर्ता ब्रह्मापि यस्य प्रसादजः प्रसादोत्थरजोत्पत्तिर्दृष्टः ततो जातत्वात् न स्वतंत्रः सर्वसंहर्ता रुद्रश्च यस्य क्रोधसंभवी न स्वतंत्रः ॥ स विश्वस्यात्मा भगवान् अत्रानुवर्ण्यते अतएवंभूतं श्रीभगवंतं शृण्वतः कुतो भयं स्यादाद्ययशंकेति ॥१॥ त्वं पुनः कृतार्थ एवेत्यनुस्मारयति पशुबुद्धिं अविवेकं यया मरिष्यामीति मन्यसे तां जहि तत्राह ॥ न जात इति यथा देहः प्रागभूत एवाद्य जातो नंक्ष्यति च न चैवं त्वं पूर्वं नाभूः नवाद्य जातोऽसि ॥ अतो न नंक्ष्यसि ॥२॥ श्रीरामचंद्राय नमो नमः ॥ ॥

ऊतइमतस्राह कालइतिपरिणामिनांनदीप्रवाहदीपज्वालादीनांयाउत्पत्त्यावस्थाःताःकालरूपस्रोतसोवे
गेनाशुह्रियमाणस्यदेहादेर्दृश्यमानाःनित्यदैवनिमित्ताजन्मप्रलयहेतवोभवंतइति॥३५॥देहःप्रतिक्षणंप्रध्वंसी
प्रतिक्षणमवस्थाभेदस्यविद्यमानत्वात्प्रदीपादिवदित्युपमानंयदिप्रतिक्षणमवस्थाभवंतितर्हिकिंनदृश्यं
ते अतोहेतवसिद्धइत्याशंक्याह॥अनाद्यंतवताकालेनजायमानाअवस्थानेवलक्ष्यंते॥आकाशेगच्छतांज्योति
षांचंद्रादीनांगमनागमनावस्थादिशाशानेवलक्ष्यंतेतद्वत॥अतोयथातेषांप्रदेशान्तरप्राप्त्याप्रतिक्षणंगमनमव
स्थाःकल्प्यंतेतद्वदत्रापिवस्तुनांरूपादिदर्शनेनमध्यवर्तिन्योवस्थाःकल्प्यंतइति॥नहेत्वसिद्धइत्यर्थः॥३६

कालस्रोतोजवेनाशुह्रियमाणस्यनित्यदा॥परिणामिनामवस्थास्ताजन्मप्रलयहेतवः॥३५॥अनाद्यंतव ना
तानेनकालेनेश्वरमूर्तिना॥अवस्थानैवदृश्यंतेवियतिज्योतिषामिव॥३६॥नित्योनैमित्तिकश्चैवत
थाप्राकृतिकोलयः॥आत्यंतिकश्चकथितःकालस्यगतिरीदृशी॥३७॥एताःकुरुश्रेष्ठजगद्विधा
तुर्नारायणस्याखिलसत्वधाम्नः॥लीलाकथास्तेकथिताःसमासतःकार्त्स्न्येननाजोप्यभिधातुमी
शः॥३८॥संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यःप्लवोभगवतःपुरुषोत्तमस्य॥लीलाकथारसनि
षेवणमंतरेणपुंसोभवेद्विविधदुःखदवार्दितस्य॥ ३९॥ ॥ ॥ ५०॥

उपसंहरतिनि मइतिपुराणार्थमुपसंहरति एताइति
३७॥लीलाविषयाःकथाःअजोब्रह्मापिकार्त्स्न्येनाभिधातुंनेशः॥३८॥ननुयदिसाकल्येनाभिधातुंनशक्य
तेतर्हिकिंतदभिधानेनतत्राह॥संसारेति विविधदुःखमेवदवोदावानलःतेनार्दितस्यपीडितस्यअतउत्ति
तीर्षोःपुंसःश्रीभगवतोयाःलीलातासांकथाःतासांरसःतन्निषेवणमंतरेण॥अन्यःप्लवःउत्तरणसाधनं
नभवेत॥उपायांतरासंभवात्तत्कथाश्रवणमेवयथाशक्तिनिषेवणीयमित्यर्थः॥३९॥५०॥ ॥ ॥

क्रियाभिः तत्र दृष्टान्तमेदेः वङ्कुयाकटककुण्डलमालातुलाकोट्यादिरूपेणालौकिकवैदिकैर्योभिर्जनैरहंकारोपहितैः तत्त्वहंकारस्य कथं ब्रह्मस्वरूपावरणं भेदयबहुभावहेतुत्वेन तस्य स्वकारणभूतब्रह्माचरकत्वासंभवात् ॥ आवरणं वा स्वस्यापि प्रकाशासंभवादित्याशंकायां सदृष्टान्तमाह ॥ यथेति ॥ अर्करश्मय एव मेघरूपेण परिणतावर्षन्ति अग्नौ प्रस्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इत्यादिवचनात् तस्मादर्कप्रभवः अर्केणैव दर्शितः प्रकाशितस्तमः स्वरूपभूतोऽर्कदर्शनप्रतिबंधको भवति अहं अहंकारः ब्रह्मगुणः ब्र

यथा हिरण्यं बहुधा समीहते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ॥ एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः ॥ ३१ ॥ यथा घनोर्कप्रभवोर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः ॥ एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः ॥ ३२ ॥ घनो यदार्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा ॥ यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ॥ ३३ ॥ यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबंधनं ॥ छित्वाच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यन्तिकमंग संप्लवं ॥ ३४ ॥ नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप ॥ उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥ ३५

स्वकार्यभूतः तदीक्षितस्तेनैव प्रकाशितश्च आत्मनो जीवस्यात्मबंधनः ब्रह्मस्वरूपदर्शनप्रतिबंधको भवति ॥ अत एवाहंकारनाशे स्वरूपदर्शनं भवतीति ॥ तेनैव दृष्टान्तेनैवाह घन इति आत्मन उपाधिर्जिज्ञासया विचारेण नश्यति तदा अनुस्मरेत् ॥ ब्रह्माहमस्मीति पश्यतीत्यर्थः ॥ ३३ ॥ सोऽयमात्यन्तिकः प्रलयः इत्युपसंहरति यदैवमिति विवेकहेतिना ज्ञानशास्त्रेण अहंकरणमेवात्मबंधनं ॥ अच्युतात्मा परिपूर्णमात्मानमनुभवतीति तथा ॥ ३४

श्री॰
भाष्य॰
टी॰
१२

ननु कार्याभावे कारणत्वं च स्यात् कुतोऽत्रोच्यते ॥ सत्यं तदपि नात्मनि समत्वमित्याह यदिति सामान्यं कारणं विशेषः का
र्यं तद्रूपेण अन्योन्यापाश्रयात् परस्परानपेक्षत्वेन निरूपणासहत्वादित्यर्थः अतः कारणत्वमवधित्वं व्यापक
त्वमित्यादिकमपि परस्परापेक्षत्वात् आपेक्षिकत्वेनैव वस्तुत इत्यर्थः ॥ यद्वा तत्रैव हेत्वंतरमेतत् उपल
भ्यते संभ्रमः सामान्यविशेषरूपत्वात् स्वप्नवत् ॥ अन्योन्यापाश्रयत्वात् इतीतरमपि हेत्वंतरं गुणगुणिविशेष
णविशेष्यव्याप्यव्यापकत्वादिरूपेणापरस्परायीनसि- त्वात् यथाभूतवद्धितिनिरासने अतो यदायंतवत्त्वम
वैमवस्त्विति ॥ २८ ॥ तदेवमनेकैर्हेतुभिः प्रपंचस्यासत्त्वं प्रसाधितं तत्र शंकानंतु प्रपंचस्यापि प्रकाशमानत्वा

यत्सामान्यविशेषाभ्यामुपलभ्येत संभ्रमः ॥ अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु यत् ॥ २८ ॥ विकारः
ख्यायमानोऽपि प्रत्यगात्मनि संततः ॥ न निरूप्यः स्वतोऽपि स्याच्चित्तस्य आत्मवान् ॥ २९ ॥ नहि समस्य
नानात्वमविद्यायादि मन्यते ॥ नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वा तयोरिव ॥ ३० ॥

न आत्मवत्सत्त्वं किं न स्यादिति ॥ तत्राह विकार इति ख्यायमानः प्रकाशमानोऽपि विकारः प्रपंचः प्रत्यगात्मप्र
काशं विना ऽभासोऽपि न निरूप्योऽस्तीति विना निरूप्यः स्याच्चेत् तर्हि सोऽपि चित्समः स्यात् चिद्रूपेणात्मना समः स्व
प्रकाशो भवेत् ॥ तथा च सति सोऽप्यात्मवत् स्यात् ॥ एकरूपः स्यादित्यर्थः ॥ २९ ॥ इतश्च न स्वप्नाहेनहीति न च समस्या
प्यात्मनो जीवब्रह्मरूपं नानात्वमस्त्येव तत्राह ॥ यद्येवं नानात्वं मन्येत तर्हि विद्वान् कथं तर्हि तयो भेदव्यवहारः उ
पाधेकृत इत्याह नानात्वमिति तत्र छिद्रयोः घटाकाशमहाकाशयोरिव तिपरिच्छेदापरिच्छेदे दृष्टांतः ज्योतिषोरा
काश- -स्य सूर्ययोरिवेत्यापाधिकृत विकारसदसद्भावेवात योर्बाह्यशरीरस्य वा घोरिवे निक्रिया भेदव्यसा

२ पदस्थं एवं भरतदासानात्वं सदसिवेदितं स्वप्नप्रतिसमस्य वा

नत्वान्वयव्यतिरेकं दृष्टांतेन प्रपंचयति दीप इति दीप चक्षुरूपयाणां तेजो विशेषाणां यथा तेजसोन्वयव्यतिरेकः तथा धीः कर्त्रीत्वानि करणानि मात्रा विषयाः स्वतो ब्रह्मणः पृथक् न संति ब्रह्मकार्यत्वात् ॥ नन्वेवं कार्यकारणयोरभेदो ॥ कार्यसत्वे कारणसत्वापा सत्वे प्रसज्येत तत्राह ॥ अन्यतमादि मकार्यादन्वयव्यतिरिक्तो ब्रह्मणः प्रपंचाद्ब्रह्मणो व्यतिरेकः प्रपंचस्यततो नास्ति व्यतिरेकश्च नार्थः ॥ २४ ॥ यदा तु बुद्धेरसत्वे तदा तदेव स्यात्तेषां तं रामसत्व मिथ्याशये नाह ॥ बुद्धेर्वितिनउ विश्वतैजसप्राज्ञानामेतास्त्वेव स्या न बुद्धेर्विमाशं कयाह मायामात्रमिति ॥ इदं वि

दीपस्थलस्थरूपं च ज्योतिषो न दृश्यम्भवेत् ॥ एवं धीः खानि मात्रास्त्र नस्त्र व्यतनमा इत्तात् ॥ २५ ॥ बुद्धेर्जा गरणस्वप्नः सुषुप्तिर्वितिरियोच्यते ॥ मायामात्र मिदं राजन्नानात्वं प्रत्ययात्मनि ॥ २६ ॥ यथा जलधरा व्यो म्नि भवंति न भवंति च ॥ ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात् ॥ २७ ॥ सत्यं ह्यवयवः प्रोक्तः सर्वा वयविनामिह ॥ विनार्थेन प्रतीयेरन्पटस्येवांग तंतवः ॥ २८ ॥ ॥ ॥ रामजयी ॥ ॥

विश्वं तैजसप्राज्ञरूपं ॥ २६ ॥ आद्यंतवत्वादिमस हेतोरसिद्धिमाशंक्य ॥ सावयवत्वेन साधयति ॥ यथेति ॥ अ वयवीति ॥ यत्सावयवं तदाद्यंतवत् ॥ घटादिवदित्यर्थः ॥ अत एव उदयाप्ययान आद्यंतवद्विश्वं संभवतीत्यर्थः यद्वा हेयगोचरगमापायित्वाद्विश्वं मिथ्याब्रह्म तु न दवथित्वात् ॥ सत्यासत्ययोरेन ना ख्यातेदृष्टांत स्त्वस्पृवोक्त एव ॥ य था जलधरा व्योम्नीति दृष्टांत स्त्वागमापायि न दवथित्व साद्ये ॥ ननु मिथ्यात्वे इति ॥ २७ ॥ अन्यत साध्यता दितिप्र तिज्ञाते ॥ कारण स्य सत्यत्वं उपपादयति ॥ सत्यं ह्यो निश्चयवयवः कारणं प्रोक्तः वाचारंभणो विकारो नामधेयं मृ त्तिकेत्येव सत्यमित्यादिश्रुतिभिः अवयुक्तिमपि दर्शयति विनेति ॥ अंग हे राजन् ॥ हिर्थसादर्थे न्यवय विनाए

या

तस्य तत्र लयो नास्तीत्याह ॥ न तस्येति कालावयवैर्होरादिभिः गुणाः सावा विकाराः परिणामः विपरिणामः अव्यक्तं अस्तित्वविकाररूपं नित्यं सर्वदा एकरूपं वृद्धिरहितमित्यर्थः ॥ अव्ययमपक्षयशून्यं सर्वहेतुः कारणमिति ॥१९॥ किंच वागादिगोचरस्य सविशेषस्य विकारो भवति ॥ इदं तु न तथेत्याह ॥ न यत्रेति वाग्भ्यां लोककल्पः सन्निवेशो रचनाविशेषः ॥२०॥ स्वप्नजाग्रत्स्वप्नजागरावस्था युक्तं सुषुप्तवत् ॥ इंद्रियाद्यभावात् शून्यवत् दृश्यहेतुः अप्रतर्क्यं न पुनः शून्यमेवेत्याह ॥ तदिति ॥२१॥ उपसंहरति लयं ॥ इति प्राकृतः ॥२२॥ आत्यंतिकलयमाह बुद्धींद्रियेति द्वादशभिः अ

न तस्य कालावयवैः परिणामादयो गुणाः ॥ अनाद्यनंतमव्यक्तं नित्यं कारणमव्ययं ॥१९॥ न यत्र वाचो न मनो न सत्त्वं तमो रजो वा महदादयोऽमी ॥ न प्राणबुद्धींद्रियदेवता वा न सन्निवेशः खलु लोककल्पः ॥२०॥ न स्वप्नजाग्रन्न च तत्सुषुप्तिर्न खं जलं भूरनिलोऽग्निरर्कः ॥ संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनंति ॥२१॥ लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा ॥ शक्तयः संप्रलीयंते विवशाः कालविद्रुताः ॥२२॥ बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयं ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु यत् ॥२३॥ ॥

येति कालयोमोक्षः सएव ब्रह्मज्ञानेन सर्वप्रपंचलयात्मकः न च प्रपंचस्यात्मवस्तुत्वे लयः संभवतीति ज्ञानरूपाश्रयस्याश्रयणाः पृथक्त्वस्यासत्त्वमुपपादयति ॥ बुद्धिश्च इंद्रियाणि च अर्थाश्च तेषां ग्राहककरणग्राह्यरूपेण तेषामाश्रयं ज्ञानमेव भाति ॥ न पृथगिति तत्र हेतुमाह ॥ दृश्यत्वाव्यतिरेकाभ्यामिति ॥ अतो यदाद्यंतवदवस्तु अतो वे प्रयोगः विमतं सत् न भवति दृश्यत्वात् कारणाव्यतिरेकात् ॥ आद्यंतवत्वाच्च रज्जुसर्पादिवदिति ॥२३॥ ॥ राम

राम राम राम राम राम

सामुद्रादिकं सर्वं च संरविः पिबते ग्राकर्षति ॥ ५ ॥ अनिलवेगोग्यः वायुवेगोद्धतः अतिलवेगोवाइतिपाठे ॥ अनिलेनवेगोयस्यसः रविरणाव ष्मिभिः पीतमुदकं च दहतीमयीः ॥ अतिलवेगोवाइतितपाठः स्वगसः भूविवरान्यातालादीन स्पृत्यानरविग्णादेहिकरसाकर्षणात ॥ आगिरदहितान ॥ ६ ॥ शिखाभिज्वालाभिः ॥ ९ ॥ किंचिदधिकं वर्षाणां श

सामुद्रं देहिकं भौमं रसं सांवर्तिकोरविः ॥ रश्मिभिः पिबते यो वैः सर्वं नेव विमुंचति ॥ ७ ॥ ततः सांवर्तिकोवह्निः संकर्षणमुखोत्थितः ॥ दहत्यनिलवेगोत्थः स्पृत्यान्भूविवरानथ ॥ ८ ॥ उपर्यधः समंतान्च शिखाभिर्वह्निसूर्ययोः ॥ दह्यमानं विभात्यंडं दग्धं गोमयपिंडवत ॥ १० ॥ ततः प्रचंडपवनोवर्षाणामधिकंशतं ॥ परः संवर्तकोवातिधूम्रं खंवजसावृतं ॥ ११ ॥ ततोमेघगजकुलानंनानाविचवर्णोनेकशः प्रतेवर्षाणिवर्षंति नदंतिरभसस्वनैः ॥ १२ ॥ ततएकोदकं विश्वं ब्रह्मांडविवरांतरं ॥ तदाभूमेर्गंधगुणंग्रसंत्यापउदप्लवे ॥ १३ ॥ ग्रस्तगंधात्तपृथिवी प्रलयत्वायकल्पते ॥ अपांरसमथोतेजस्ताल्लीयंतेथनीरसाः ॥ १४ ॥ ग्रसतेतेजसोरूपंवायुस्तद्रहितंतदा ॥ लीयतेचानिलेतेजोवायोःखंग्रसतेगुणं ॥ १५ ॥ सवैविशतिखंराजंस्ततस्तनभसोगुणं ॥ १६ ॥ शब्दंग्रसतिभूतादिर्नभस्तमनुलीयते ॥ तैजसश्चेंद्रियाणयंगदेवावैकारिकोगुणैः ॥ १७ ॥ महान्ग्रसत्यहंकारंगुणाः सत्वादयश्चतं ॥ ग्रसतेव्याकृतंराजंस्तुणान्कालेनचोतंसांवर्तकः परोवायुर्वाति ॥ तदारजस्तमसावृतांखंधूम्रंभवति ॥ ११ ॥ रभसस्वनैर्मीग्रगजितैः ॥ १२ ॥ ब्रह्मांडविवरांतरंब्रह्मांडविवरमध्यगतंविश्वमेकोदकं एकार्णवोदकांतंभवति ॥ १३ ॥ उदप्लवेउदकेनप्लाविते सतिप्रलयत्वायाभावाय ॥ १४ ॥ भूतादिस्तामसोहंकारः गुणैर्हेतिभिः सह ॥ १७ ॥ अव्याकृतंप्रधानं ॥ १८ ॥ ॥ ॥

टी॰ ९८

५२

द्विषतः शत्रुसमभ्यासा ॥ ३० ॥ येन शंखवरादयः नेघो ॥ ३९ ॥ माहात्म्यं प्रभावः ॥ ४० ॥ मर्त्यपविलासाः मानुषत्वस्यांतर्यानि
द्वादशार्थमाह ॥ युगेति युगलस्तनाततदुक्तरूपाह त्रिस्त्रयष्टः त्रिविधाप्राकृतिकानैमित्तिकानित्याचेति ॥ ४३ ॥ अस
व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः ॥ कंसस्य द्विजचाणूरकंसादीनां च यो वधः ॥ ३३ ॥ मृतस्यानयनं
सूनोः पुनः सांदीपनेर्गुरोः ॥ ३४ ॥ मथुरायां निवसता यदुचक्रस्य यत्प्रियं ॥ कृतमुद्धवरामाभ्यां युतेन हरि
णा द्विजाः ॥ ३५ ॥ जरासंधसमानीत सैन्यस्य बहुशो वधः ॥ घातनं यवनेंद्रस्य कुशस्थल्या निवेशनं ॥ ३६ ॥
आदानं पारिजातस्य सुधर्मायाः सुरालयात् ॥ रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः ॥ ३७ ॥ हरस्य
जृंभणं युद्धे बाणस्य भुजकृंतनं ॥ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ॥ ३८ ॥ चैद्यपौंड्रक
साल्वानां दंतवक्त्रस्य दुर्मतेः ॥ शंबरो द्विविदः पीठो मुरः पंचजनादयः ॥ ३९ ॥ माहात्म्यं च वधस्ते
षां वाराणस्याश्च दाहनं ॥ भारावतरणं भूमेर्निमित्तीकृत्य पांडवान् ॥ ४० ॥ विप्रशापापदेशेन सं
हारः स्वकुलस्य च ॥ उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ॥ ४१ ॥ यत्रात्मविद्या ह्यखिला प्रोक्ता
धर्मविनिर्णयः ॥ ततो मर्त्यपरित्याग आत्मयोगानुभावतः ॥ ४२ ॥ युगलक्षणवृत्तिश्च कलौ नृणा
मुपप्लवः ॥ चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ॥ ४३ ॥ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः
शाखाप्रणयनमृषेर्मार्कंडेयस्य सत्कथाः ॥ ४४ ॥ महापुरुषविन्यासः सूर्यस्य जगदात्मनः ॥ ४४
इति चोक्तं द्विजश्रेष्ठ यत्पृष्टोहमिहास्मि वः ॥ लीलावतारकर्माणि कीर्तितानीह सर्वशः ॥ ४५

र्यासर्वैः सूर्यस्य च विन्यासस्तु सपर्या ॥ ४४ ॥ इति चोक्तमिति च कारादन्यदपि वः युष्माभिरिहयत्पृष्टोस्मि
तत्तदुक्तमिति किमेवं नानार्थकथनेन तत्राह लीलेति सर्वतः तदर्थकीर्तनद्वारा समर्थः ॥ ४५ ॥ रामजी

नवमार्थे हराजवंशोक्ति ॥१५॥ तन्नतनस्य च श्रीमस्य ॥१६॥ दशमस्कंधार्थसारस्य तस्य श्रीकृष्णस्य कर्माणि निरू

कौर्मं मात्स्यं नारसिंहं वामनं च जगत्पतेः ॥ नीरोदमथनं तत्र हृदमृता पृथ्वी दिवौकसां ॥१७॥ इलोपाख्यान
मचीकृतरीपाख्यानमेव च ॥ सूर्यवंशानुकथनं पाशादादप्यन्त्रवादयः ॥१८॥ देवासुरमहायुद्धं राजवं
शानुकीर्तनं ॥ इक्ष्वाकुजन्मतद्वंशः सुद्युम्नस्य महात्मनः ॥१९॥ सोमवंशादिभूतस्य च रितं तनयो ॥२०॥ ऐलस्य
सौकन्यचायनशर्यातिः ककुद्मस्य च धीमतः ॥ खट्वांगस्य च मांधातुः सौभरेः सगरस्य च ॥२३॥ राम
स्य कोसलेन्द्रस्य चरितं किल्बिषापहं ॥ निमेरंगपरित्यागो जनकानां च संभवः ॥२४॥ रामस्य भार्गवें
द्रस्य निःक्षत्रीकरणं भुवः ॥ ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च ॥२५॥ दौष्यंतेर्भरतस्यापि शं
तनोस्तत्सुतस्य च ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशानुकीर्तनं ॥२६॥ यत्रावतीर्णो भगवान्कृष्णाख्यो जग
दीश्वरः ॥ वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले ॥२७॥ तस्य कर्माण्यपारणि कीर्तितान्यसुरद्वि
षः ॥ पूतनासुपयः पानं शकटोच्चाटनं शिशोः ॥२८॥ तृणावर्तस्य निष्पेषः तथैव बकवत्स
योः ॥ धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः ॥२९॥ गोपानां च परित्राणं दावाग्नेः परिसर्प
तः ॥ दमनं कालियस्याहेर्महाहेर्नंदमोक्षणं ॥३०॥ व्रतचर्या तु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः
प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनं ॥३१॥ गोवर्धनोद्धरणं च शक्रस्य सुरभेरथ यज्ञाभि

षेकः कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ॥३२॥

ननायाग्रस्य सहितस्य स्मस्य प
सरवस्य ॥ २९ ॥ यज्ञाभिषेकं यत्र सृजाग्र मिषकस्य नयो वें दे कोयसः पानं ॥२८॥ सहभ्रातुःस
३२ ॥ राम

गतिः स्वरूपं ब्रह्माण्डं हरात्रं ॥१०॥ अर्थायेषां नारीणनवंश्यानतस्य ॥११॥ संतानो धर्मपत्नीनामिति तन्नवत्रुत्सस सञ्जयन्ति
स्यानुग्रम्नंतवेदृष्ट्वं ॥१२॥ चतुर्थस्कंधमाह ॥ नवब्रह्मणां मरीच्यादीनां कर्षीणां सञ्जनतिः संतानः ॥१४॥
पंचमस्कंधार्थमाह ततः प्रियव्रतप्रियव्रतस्य चरितं ॥१५॥ द्वीपाष्टवर्षानि पृथ्वसंस्थेतोपतः ततो द्वीपाद्वीनां वि

कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः ॥ भुवनं ब्रह्मणां मोघौ हिरण्यादृत वयो यथा ॥१०॥ ऊर्ध्वति
र्यगर्वाक्स्त योनिरुद्रसर्गस्तथैव च ॥ अर्धनारीनरस्याथ यतः स्वायंभुवो मनुः ॥११॥ शतरूपा च या स्त्री।
णां साद्या प्रकृतिरुत्तमा ॥ संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः ॥१२॥ अवतारो भगवतः कपिल
स्य महात्मनः ॥ देवहूत्याश्च संवादः कपिलेन च धीमता ॥१३॥ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं
पश्चात् ध्रुवस्य चरितं पश्चात् पृथोः प्राचीनबर्हिषः ॥१४॥ नारदस्य च संवादः ततः प्रियव्रतं द्विजाः ॥ नाभेस्ततो
नुचरितमृषभस्य भरतस्य च ॥१५॥ ततो द्वीपसमुद्राद्रिवर्षनद्युपवर्णनं ॥ ज्योतिश्चक्रस्य संस्थानं पा
तालनरकस्थितिः ॥१६॥ दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च संततिः ॥ यतो देवासुरनरास्तिर्यङ्नग
खगादयः ॥१७॥ त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्च दितेर्द्विजाः ॥ दैत्येश्वरस्य चरितं प्रह्लादस्य महात्म
नः ॥१८॥ मन्वन्तरानुचरितं गजेन्द्रस्य विमोक्षणं ॥ मन्वन्तरावताराश्च विष्णोर्हयशिरादयः ॥१९॥
स तेन

रयोर्नद्यश्च तदुपवर्णनं पातालनरकादीनां च स्थितिः ॥ अनेनैव नरकनिवर्तकं ॥ अजामिलोपाख्यानं गृहीतं त
तः पराचीनं ॥१६॥ षष्ठार्थमाह दक्षजन्मेति सप्तमार्थमाह पुत्रयोश्चेति ॥१७॥ अष्टमार्थमाह ॥ मन्वंतरानुचरि
तमिति स्वायंभुवस्य चिदंशे कीः सुतश्चोभौ क्षिप्रमक्षिरमाउत्पलाने नेति दृष्टवं ॥१९॥ ॥ रामाय नमः ॥

पुरुषत्वेऽवितं श्रवणायचोदितं ॥ २ ॥ एतत्स्वयं च यति मे नेति भगवान् ॥ ऐश्वर्यादिषड्गुणः सान्तानं संकीर्तितं इति देवता
काण्डार्थः ॥ ३ ॥ ब्रह्मकाण्डार्थमाह सहस्रं ब्रवैवेति गुणैर्निर्गुणं प्रभवाप्ययं प्रभवति अस्मादिति प्रभवं ॥ अप्येति अस्मिन्निति
तिश्च प्ययं तत्त्वत स्वश्वेनेनाश्रयशाखोदितः विज्ञानेयुतंश्च यदोत्तपरोतेज्ञानं तद्रुपाख्याने तज्ज्ञानस्रुपाख्यायते प्रका
श्यते येन तत् ॥ ज्ञानसाधनं रूपः वेदाश्रये भक्तियोगेन निष्पादितं एवं सामान्यतो निरूपितानीदानीं द्वादशस्कंधप्रक
सिनयर्थः ॥ ४ ॥ कर्मकाण्डार्थमाह ॥ भक्तियोग साधनसाधन ॥

एतद्वः कथितं विप्रा विस्तरेश्च विनमद्भुतं ॥ भवद्भिर्यदहं पृष्ठो नरायांपुरुषो चितं ॥ २ ॥ यत्र संकीर्तितः सा
तान्सर्वपापहरो हरिः ॥ नारायणो हृषीकेशो भगवान्सात्वतां पतिः ॥ ३ ॥ अत्र ब्रह्म परं गुह्यं जगतः प्रभवा
प्ययं ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं ॥ ४ ॥ भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयं ॥ पा
रीक्षितमुपाख्यानं नारदाख्यानमेव च ॥ ५ ॥ प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः ॥ शुकस्य
च ब्रह्मर्षेः संवादश्च परीक्षितः ॥ ६ ॥ योगधारणया योत्क्रान्तिः संवादो नारदाजयोः ॥ अवतारानुगीतं च
सर्गः प्राधानिकोऽग्रतः ॥ ७ ॥ विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः ॥ पुराणसंहिताप्रश्नो महापुरुषसं
स्थितिः ॥ ८ ॥ ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये ॥ ततो ब्रह्माण्डसंभूतिर्वैराजः पुरुषो यतः ॥ ९

२ ॥ तार्थमनुक्रामति यावीदितमुपाख्यानं परीक्षित जन्मादितमस्तावायनारदाख्यानं च ॥ ५ ॥ ब्रह्मर्षेर्ब्रह्मगोत्रम
स ॥ इति प्रथमस्कंधार्थः ॥ ६ ॥ उत्क्रांतिर्वर्चिराद्यागतिः प्राधानिकः प्रधानकार्यविराड्रूपः अग्रतः आदितः स
हदादिक्रमेणोयसर्गः इति द्वितीयार्थः ॥ ७ ॥ महापुरुषसंस्थितिः प्रलये तल्लीनमवस्थानं ॥ ८ ॥ प्राकृतिकः प्र
कृतिभवो गुणानां महत्वः वैकृतिका महदादयः वकाशाद्विकाराश्च येतयोस्तेषां च सर्गः ॥ ९ ॥ ॥ ॥

46

श्री॰ भा॰ द्वा॰ टी॰ ३९

तेषां पृथक्पृथक्कर्माणि निरूपयति द्वादशस्वपीति त्रिभिः असौ देवः सूर्यः षड्भिरेभिर्दिवि समन्ततश्चरन् समन्तात्
तनुते ॥ शुभां मतिं तनुते गायत्र्यर्थः एतेन सूचितः ॥ ४६ ॥ तल्लिङ्गैः सूर्यप्रकाशकैः ४७ ॥ उन्नह्यन्ति दृढं बध्नन्ति ॥ ग्राम
ण्यो रथयोजकाः नैरृता बलशालिनः ॥ ४८ ॥ किं च वालखिल्या इति ॥ एतेन प्रतिमासं तत्तद्विशिष्टं सूर्यं ॥ ४९ ॥ व्यूह्य विभज्य ॥ ५० ॥

द्वादशस्वपि मासेषु देवोसौ षड्भिरस्य वै ॥ चरन्समंतात्तनुते परत्रेह च सन्मतिं ॥ ४६ ॥ सामर्ग्यजुर्भिस्त
ल्लिंगैरृषयः संस्तुवंत्यमुं ॥ गंधर्वास्तं प्रगायंति नृत्यंत्यप्सरसोग्रतः ॥ ४७ ॥ उन्नह्यंति रथं नागा ग्रामण्यो र
थयोजकाः ॥ चोदयंति रथं पृष्ठे नैरृता बलशालिनः ॥ ४८ ॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोम
लाः ॥ पुरतोभिमुखं यांति स्तुवंति स्तुतिभिर्विभुं ॥ ४९ ॥ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः ॥ क
ल्पे कल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः ॥ ५० ॥ इति श्रीभागवते द्वादशस्कंधे ए
कादशोध्यायः ॥ ११ ॥ श्रीसूत उवाच ॥ नमो धर्माय महते नमः कृष्णा
य वेधसे ॥ ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् ॥ १

इति श्रीभावार्थदीपिकायां द्वादशस्कंधे एकादशोध्यायः ॥ ११ ॥ द्वादशे तु पुराणोक्तसर्वार्थानुक्रमः कृतः ॥ प्रथम
स्कंधमारभ्य प्राधान्येन समासतः ॥ १ ॥ तदेवास्मिन् श्रीभागवते महापुराणे उक्तानर्थान्संक्षेपतो वर्णयिष्यन्
धर्मादीन् ॥ प्रणमति सूतः नम इति हता हरिभक्तिलक्षणाय ब्रह्मणेभ्यः ब्राह्मणान्सनातनान् धर्मानिह सपल
वान् पुराणोक्तार्थान् ॥ १ ॥ ॥ रामाय नमः

47

त्वष्टा सूर्यः ॥ १ ॥ ऋचीकतनयो जमदग्निः ऋषिः ॥ २ ॥ कंबलाश्वो नागः ॥ ३ ॥ तिलोत्तमा अप्सराः ॥ ४ ॥ ब्रह्मापेतो राक्षसः ॥
शतजित् यक्षः ॥ ६ ॥ धृतराष्ट्रो गंधर्वः ॥ ७ ॥ इषंमासं आश्विनं पालकाः ॥ ५३ ॥ विष्णुः आदित्यः ॥ १ ॥ अश्वतरो नागः
रंभा अप्सराः ॥ ३ ॥ सूर्यवर्चा गंधर्वः ॥ ४ ॥ सत्यजित् यक्षः ॥ ५ ॥ मखापेतो राक्षसः ॥ ६ ॥ विश्वामित्र ऋषिः ॥ ७ ॥ ऊ
र्जमासं कार्तिकं ॥ ५४ ॥ एते वादित्यादयः कौर्मे विभज्योक्ताः धाता यमा च मित्रश्च वरुणो इंद्र एव च ॥ विवस्वानथ
पूषा च पर्जन्यस्त्वंशुरेव च ॥ भगस्त्वष्टा च विष्णुश्च आदित्या द्वादश स्मृताः ॥ १ ॥ पुलस्त्यः पुलहः चात्रिर्वसिष्ठोऽथ
अंगिरा भृगुः ॥ गौतमोऽथ भरद्वाजः कश्यपः क्रतुरेव च ॥ जमदग्निः कौशिकश्च ऋषयो ब्रह्मवादिनः ॥ २ ॥ रथकृच्चा
रिष्टनेमिर्ग्रामणी रथस्वनः ॥ रथचित्रस्वनः श्रोता सुषेणः सेनजित्तथा ॥ तार्क्ष्यश्चारिष्टनेमिश्च ऋतजित्सत्यजि

(आश्विन)

त्वष्टा ऋचीकतनयः कंबलाश्वः तिलोत्तमा ॥ ब्रह्मापेतोऽथ शतजिद्धृतराष्ट्र इषंभराः ॥ ५३ ॥ विष्णुरश्वत
रो रंभा सूर्यवर्चाश्च सत्यजित् ॥ विश्वामित्रो मखापेत ऊर्जमासं नयंत्यमी ॥ ५४ ॥ एता भगवतो विष्णोरा
दित्यस्य विभूतयः ॥ स्मरतां संध्ययोर्नृणां हरंत्यंहो दिने दिने ॥ ५५ ॥ ॥

तथा ॥ ३ ॥ इति यक्षाः ॥ अथ हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा ॥ वर्यो व्याघ्रस्तथापश्च वायुर्विघ्न दिवाकरेः ब्र
ह्मापेतश्च विप्रेंद्र यज्ञापेतस्तथा राक्षसाः ॥ ४ ॥ वासुकिः कच्छनीरश्च तक्षकः सर्पपुंगवः ॥ एलापत्रः शंखपालः तथै
रावतसंज्ञितः ॥ धनंजयो महापद्मः तथा कर्कोटको द्विजाः ॥ कंबलोऽश्वतरश्चैव वहंत्येनं यथाक्रमं ॥ ५ ॥ तुंबुरुर्ना
रदो हाहा हूहू विश्वावसुस्तथा ॥ उग्रसेनो वसुरुचिर्विश्वावसुरथापरः ॥ चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमाः
सूर्यवर्चा द्वादशैते गंधर्वा गायतां वराः ॥ ६ ॥ क्रतुस्थलाप्सरो वर्या तथान्या पुंजिकस्थली ॥ मेनका सहजन्या च
प्रम्लोचा च द्विजोत्तम सर्वभावेति द्विजश्रेष्ठाः तथैवाप्सरसः स्मृता इति ॥ ७ ॥ ५५ ॥ ॥

५
२

48

कालरूपधारिणो हरेः ॥ ३ ॥ द्वादशादित्यरूपभेदं क्रियाकारिणं व्यूहं सर्वकर्मप्रवर्तकं मायाकृतं नवधा भेदमाह ॥ काल इति कालः प्रातरादिः देशः समादिः क्रिया अनुष्ठानं कर्ता आत्मा करणं सुवादिः आगमः मन्त्रादिः द्रव्यं व्रीह्यादिः फलं स्वर्गादि ॥ ३ ॥ तत्र कालरूपधारी भगवान् पृथक् चरति चैत्रादिषु मासेषु लोकतन्त्राय यात्रानिर्वाहाय ॥ ३२ ॥ तानेव गणानाह धातेति द्वादशभिः धाता सूर्यः ॥ १ ॥ कृतस्थली अप्सराः

नाग २ यक्ष २ ऋषि २ गंधर्व २ । देवं २ सूर्य २ अप्सरा २

कालो देशः क्रियाकर्ता करणं कार्यमागमः ॥ द्रव्यं फलमिति ब्रह्मन्नवधोक्तोऽजया हरिः ॥ ३ ॥ मध्वादिषु द्वादशसु भगवान्कालरूपधृक् ॥ लोकतंत्राय चरति पृथग्द्वादशभिर्गणैः ॥ ३२ ॥ धाता कृतस्थली राक्षस २ हेतिर्वासुकी रथकृन्मुने ॥ पुलस्त्यस्तुम्बुरुरिति मधुमासं नयन्त्यमी ॥ ३३ ॥ अर्यमा पुलहोऽथौजाः प्रहेतिः पुंजिकस्थली ॥ नारदः कच्छनीरश्च नयन्त्येते स्म माधवं ॥ ३४ ॥ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहाः ॥ रथस्वन इति ह्येते शुक्रमासं नयन्त्यमी ॥ ३५ ॥ वसिष्ठो वरुणो रम्भा सहजन्यस्तथा हुहूः ॥ शुक्रश्चित्रस्वनश्चैव शुचिमासं नयन्त्यमी ॥ ३६ ॥ ॥

२ हेतिः राक्षसः ॥ ३ ॥ वासुकिर्नागः ॥ ४ ॥ रथकृत् यक्षः ॥ ५ ॥ पुलस्त्यः ऋषिः । तुम्बुरुः गंधर्वः ॥ ७ ॥ ३३ ॥ अर्यमा सूर्यः ॥ पुलहः ऋषिः ॥ २ ॥ अथौजा यक्षः ॥ ३ ॥ प्रहेतिः राक्षसः ॥ ४ ॥ नारदो गंधर्वः ॥ ५ ॥ कच्छनीरो नागः ॥ ६ ॥ पुंजिकस्थली अप्सराः ॥ ७ ॥ माधवे वैशाखे ॥ ३४ ॥ मित्रः सूर्यः ॥ १ ॥ अत्रिः ऋषिः ॥ २ ॥ पौरुषेयो राक्षसः ॥ ३ ॥ रथस्वनो यक्षः ॥ ४ ॥ तक्षको नागः ॥ ५ ॥ मेनका अप्सराः ६ हाहा गंधर्वः ॥ ७ ॥ शुक्रे ज्येष्ठे ॥ ३५ ॥ वरुणः सूर्यः ॥ १ ॥ वसिष्ठः ऋषिः २ रम्भा अप्सराः सहजन्यः यक्षः ॥ ४ ॥ हूहूः गंधर्वः ॥ ५ ॥ शुक्रो नागः ॥ ६ ॥ चित्रस्वनो राक्षसः ॥ ३६ ॥ ७ ॥

५०

श्री
भाग्य
टी
५४

यस्येदं रूपमात्मनः स्कंदं तं श्रीकृष्णं पृष्टवान्यत्नेन कृष्णस्य वैशम्पायनः । तस्य शास्त्रं वेदमूर्तिः सोऽहं श्रवणे निर्दिष्टो योऽधुना तन्मे । तेषां व
शाखाः सह तत्र नपर्व्वा समाख्याता वीर्यपराक्रमं यस्या योऽपवनितानां त्वत्राः समुद्राः भूपानामादयः । तेषां नतीर्थपाभू
तं श्रवः कीर्तिर्यस्य श्रवणे मे वमंगलं यस्य ॥ २ ॥ एतज्जपमाश्च स्यापि व्रतलतानां फलमाह य इति कलौ वशाः काले
तं विज्ञतः प्रयतः शुचिः श्रुणुतं नमागुत्ता भावेहे दिव्यं श्रवणं प्रपणति ॥ २ ॥ मेतुलं देवयेन नमितं त्वावुद्धिमागतः सू
र्तिं मूढ प्रसंमेन रविमूढो नयष्टव्यानं तेषुक इति पंच मे यदाह ॥ तथा चैव स्वयं यो गोऽयर्वा स्मर सोमा गाग्रामेत्योयातं

श्रीकृष्ण कृष्ण सर्वेषां तं माभावनिष्ठुराजन्मदं शादहनानपवर्गवीर्य ॥ जोविंदयोऽपवनितात्रज भूपगी
नतीर्थश्रवः ॥ श्रवणेमंगलपादि भूपान् ॥ २५ ॥ यद्दक्कान्तं श्रेयो महापुरुषं लेनेता ॥ तं विज्ञतः प्रय
तोऽजमावत्तं वेदगुह्यं ॥ २५ ॥ शौनकः ॥ पूर्वं यदाह भगवानिति तत्पुनीय पृच्छाप्यते ॥ सोऽवोचनाममिता
भिनानावसतिसमकं ॥ २० ॥ तेषां नामानि कर्माणि समयुक्तानामथोऽस्त्रै ॥ भूहितः अद्यानानां मूहं
सूर्यात्मनो हरेः ॥ २७ ॥ सूत उवाच ॥ अनादिविषया विलोभात्मनः सर्वदेहिनां ॥ निर्मितो लोक तंत्रोऽयं लो
केषु परिवर्तते ॥ २८ ॥ एक एव हि लोकानां सूर्य आत्मादिकृद्वरिः । सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः

धानादेवास्ये कैककयोगताः सुमेत्यादिनामोऽत ॥ सूर्यसंबंधी समानाः तान् ॥ २२ ॥ तेषां समानानामथौस्त्रैस्ततम
तिभिः सानत्तमासाधिष्ठितं सूर्यैर्वामूढविभाग ॥ २० ॥ तत्र तावत्सूर्हेनिरूपयितुं प्रथमं श्रीभगवान्सूर्यस्वरूप
माह ॥ अनादिविषयात्सूर्यो लोकतंत्रः ॥ लोकयात्राप्रवर्तकः ॥ २९ ॥ एतस्य क्रियाभेदोपाधिकमेवानां तनस्य
तदमाह एक एवेति सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः ॥ नमदात्मा आदिकत्स्रष्टिकर्ता हरिरेव सूर्यः सच
सर्वासां वेदोक्तक्रियाणां मूलं सन्नतेनो पाप्नो बहुधोक्तः ॥ ३० ॥ श्री ॥ ॥ ॥

५४

श्री भाग टी ५५

इंद्रियाणीशशरावाण्याहुराकूतीरस्य स्यंदनं ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां ॥ आकूतीः क्रिया
शक्तियुक्तं मनः स्यंदनं रथं अस्याभिव्यक्तिं आहुः ॥ वरदाभयादिरूपमुद्रया धृतायामर्थक्रियात्मतां आवरणदेवतादिरूपेण वि
भक्तिं तन्मात्राणि तत्र तत्र यथाभावयेदित्यर्थः ॥१६॥ मंडलं देवयजनं देवपूजाभूमिः सर्वतोभद्रादिमंडलं तन्मात्रं भावयेदित्यर्थः
अनेन वह्निमंडलं वा दीक्षासंस्कार आत्मनः ॥ पूजकस्यात्मनः दीक्षामेव आत्मनः संस्कारं भावयेदित्यर्थः ॥ प
रिचर्येति श्रीभगवतः परिचर्यैव सकलपापक्षयाय एवंरूपं भावयेदित्यर्थः ॥१७॥ एवं ध्यानमप्युक्त्वान

इंद्रियाणीशशराण्याहुराकूतीरस्य स्यंदनं ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां ॥१६॥ मंडलं दे
वयजनं दीक्षा संस्कार आत्मनः ॥ परिचर्या भगवतो आत्मनो दुरितक्षयः ॥१७॥ भगवान्भगवच्छब्दलीला
कमलमुद्वहन् ॥ धर्मं यशश्च भगवांश्चामरे व्यजनेऽभजत ॥१८॥ आतपत्रं तु वैकुंठं द्विजा धामाकुतोभयं ॥ त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषं ॥१९॥ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ वि
ष्वक्सेनस्तंत्रमूर्ति ॥ विदितः पार्षदाधिपः ॥२०॥ ॥

दाकारं मनः स्यंदनमाह भगवानिति श्रीभगवच्छब्दार्थमैश्वर्यादिषाड्गुण्यं ॥१८॥ हे द्विजाः एकपत्रं चर्मणो वा पाठः
अकुतोभयं वैकल्पं धाम गृहं तं समभजत ॥ यद्वा वैकुंठस्य विशेषणं अकुतोभयं यद्धाम तत्तेजो भजत ॥ ऋग्यजुः साम
वेदत्रयरूपो वेदः ॥ सुपर्णाख्यो गरुडत्वं त्रिवृद्वेदः यज्ञमूर्तिं वहति पूरुषं इति ॥१९॥
अनपायिनी श्रीदेवः शक्तिः ॥ तत्र देवः साक्षादात्मनः स्वरूपभूता चित्स्वरूपानान्तरा इत्यर्थः ॥ तंत्रमूर्तिः पंचरा
त्रागममूर्तिः ॥ योगीनामात्मयोगो नंदादयो द्वारपाला नंदादयः ॥२०॥ ॥

इति श्रीभावार्थदीपिकायां द्वादशे दशमः ॥१०॥ एकादशे तु महापुरुषवर्णनं ॥ तद्व्यूहस्य चाख्यानं प्रति
मासं पृथक् पृथक् ॥ येनामर्त्यत्वमाप्नोति मर्त्योसौ भागवतोत्तमः ॥ तत्र कृतिक्रियायोगं संपाद्यांगादिकल्पितं ॥
पृच्छति हे भागवत्प्रियतो भवान् ॥ समस्ततंत्रसिद्धांते तत्त्ववित् ॥१॥ पृष्टव्यमाह तांत्रिका इति परिचर्यायां उपासनायां
विषये केवलस्य चैतन्यघनस्य अंगानि पादादीनि उपांगानि गरुडादीनि ॥ आयुधानि सुदर्शनादीनि ॥ आकल्पः

वर यां२

इति श्रीभागवते द्वादशस्कंधे दशमोध्यायः ॥१०॥ शौनक उवाच ॥ अथेममर्थं पृच्छामो भवंतं बहु-
वित्तमं समस्ततंत्रराद्धांते भवान्भागवतत्त्ववित् ॥१॥ तांत्रिकाः परिचर्यायां केवलस्य श्रियः पतेः
अंगोपांगायुधाकल्पं कल्पयंति यथा च यैः ॥२॥ तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सतां येन क्रि-
यानैपुण्येन मर्त्यो यायादमर्त्यतां ॥३॥ सूत उवाच ॥ नमस्कृत्य गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि याः प्रो-
क्ता वेदतंत्राभ्यामाचार्यैः पद्मजादिभिः ॥४॥ मायाद्यैर्नवभिस्तत्त्वैः स विकारमयो विराट् निर्मितो दृ-
श्यते यत्र सचित्के भुवनत्रयं ॥५॥

कौस्तुभादयः तेषां द्वंद्वैकवत् यथा कल्पयंति येश्च मंत्रैः कल्पयंति तन्नो वर्णय ॥३॥ गुरूपदेशगम्यत्वादस्या-
र्थस्य तन्नमस्कारपूर्वकमाह ॥ नमस्कृत्येति विभूतीर्विराड्विग्रहाद्याः ॥४॥ अंगादिकल्पनां भूषादिभिः दर्शयि-
तुं प्रथमं तावद्यथा कल्पयंतीति प्रश्नस्योत्तरं वक्तुं विराड्विग्रहमाह मायाद्यैः प्रकृतिसूत्रमहदहं-
कारपंचतन्मात्रैर्नवभिस्तत्त्वैः विकारैः एकादशेंद्रियाणि पंचभूतानीति षोडशात्मको यो विराट् ॥ स प्रसिद्धो निर्मितो
यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते ॥ अनेनांगादिकल्पनामूलभेदो दर्शितः ॥५॥

कामोयं सर्वोपि यमंजुष्टांपयशः इत्यादि ब्रह्मवर्चस्विनः केभूयादिस्मृतं नेगान्वयः यन्नस्त्वमयोदजे भक्तिमान् ॥३५॥ तस्य
कर्मतपआदिमुनेः पुरानुभूतं श्रीभगवान्मायावैभवं तद्यक्षके घयन् ॥३७॥ अवाप्तो योगमहिमा येन सः ॥३८॥ एतन्मा
र्कंडेयस्य वर्णितं तेनानुभूतं न श्रीभगवन्मायावैभवं तेनुवर्णितं ॥३९॥ नन्वेवमप्यसत्कलो न यत्स्मात्स्यात्सम
कल्पाग्रहूहतेरुचमानं विदतमेवतस्याह ॥ एतन्मार्कंडेयानुभूतं श्रीभगवन्मायावैभवं नानाकल्परूपं कदा

कामस्ते यं महर्षे स्तु भक्तिमांस्त्वमयोदजे ॥ आकल्पांताद्यशःपुण्यमजरामरतां तथा ॥३५॥ ज्ञानं त्रैका
लिकं ब्रह्मन्विज्ञानं च विरक्तिमत् ॥ ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यतास्तु ते ॥३६॥ सूत उवाच ॥ एवं व
रान्समुनये दत्वागात्त्र्यक्ष ईश्वरः ॥ देव्यै तत्कर्म कथयन्ननुभूतं पुरामुनेः ॥३७॥ सोप्यवाप्तमहायोगम
हिमा भार्गवोत्तमः ॥ विचरत्यधुनाप्यद्धा हराव्वेकांततां गतः ॥३८॥ अनुवर्णितमेतत्ते मार्कंडेयस्य धी
मतः ॥ अनुभूतं भगवतो मायावैभवमद्भुतं ॥३९॥ एतत्केचिदविद्वांसो मायासंसृतिमात्मनः ॥ अना
द्यावर्तितं नृणां कदाचित्कं प्रचक्षते ॥४०॥ य एवमेतद्भृगुवर्य वर्णितं रथांगपाणेरनुभावभावितं
संश्रावयेत्संशृणुयादु तावुभौ तयोर्नकर्माशयसंसृतिर्भवेत् ॥४१॥ ॥

चित्कं ईश्वरेच्छया तस्यैवास्मिकं ॥ नतु सर्वसामुपावर्णं ॥ एतत्केचिदनादिवदकालं ॥ आवर्तितं देवयुगसहस्रद्वा
यमानेन पुनः पुनः परिवर्तितं प्रवदंति तेल्प्रणां संसृतिसर्वप्रलयादिलक्षणं ॥ आत्मनो भगवतो मायाइत्येवम
विद्वांसः विद्वांसस्तु मायाधिष्ठाः स्वात्मसाक्षात्कारसामर्थ्यमहत्वेन तु परप्रवेश[illegible]निर्गमतः सप्तकल्पत्वं गाम
वैतोति वदंति ॥ अतो न विरोध इत्यर्थः ॥४०॥ संशृणुयात्ततः संश्रावयेद्वा यौ तावुभौ तयोः कर्मवासनाकृता संसृ

इयं लीला दुर्विभाव्या ॥ अविततर्क्याः यद्यस्माद् ईशितव्यानि ॥ स्वनियम्यान्यभिमुखानि जगदीश्वराः स्वयं नमन्ति स्तुवन्ति चेति ॥ २७ ॥ अथवा लोकसंग्रहमात्रमेतदित्याह धर्ममिति ॥ प्रवक्तारो येऽपि यत्नवन्तो देहिनां धर्मस्याचरन्तीति ॥ २८ ॥ नन्वेतत्स्वभावतिरस्कारः कथं मया क्रियते तत्राह नेति ॥ एतावता लोकसंग्रहमात्रेणानेन नमनादिभिः कथंभूतैः स्वमायामयीभिर्वृत्तिभिः श्रीभगवतो मायिनस्तत्त्वानुभावो न दुष्येत यतः प्रसिद्धस्य मायिनः ऐन्द्रजालिकस्य कपटं यथा तथैतान्नमनादीनीति।

प्र२

ऋषिरुवाच ॥ अहो ईशस्य चर्येयं दुर्विभाव्या शरीरिणाम् ॥ यन्नमन्तीशितव्यानि स्तुवन्ति जगदीश्वराः ॥ २७ ॥
धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनाम् ॥ आचरन्त्यनुमोदन्ते क्रियमाणं स्तुवन्ति च ॥ २८ ॥ नैतावता भगवतः स्वमायामयवृत्तिभिः ॥ न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा ॥ २९ ॥ सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ॥ गुणैः कुर्वद्भिराभाति कर्तेव स्वप्नदृग्यथा ॥ ३० ॥ तस्मै नमो भगवते त्रिगुणाय गुणात्मने ॥ केवलायाद्वितीयाय गुरवे ब्रह्ममूर्तये ॥ ३१ ॥ किं वरं नु वरं भूमन्वरोऽस्मद्वरदर्शनात् ॥ यद्दर्शनात्पूर्णकामः सत्यकामः पुमान्भवेत् ॥ ३२ ॥ वरमेकं वृणेऽथापि पूर्णात्कामाभिवर्षणात् ॥ भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥ ३३ ॥ सूत उवाच ॥ इत्यर्चितोऽभिष्टुतश्च मुनिना सूक्तया गिरा ॥ तमाह भगवाञ्छर्वः शर्वया चाभिनन्दितः ॥ ३४ ॥ ॥

अतस्तस्य यथा कुहकेनात्मानुभावो दुष्यत इति तद्वत् ॥ प्रदुष्येतेति पाठे नकारस्य दृष्टान्तेऽनुषङ्गः ॥ २९ ॥ मायाचेष्टितं प्रपञ्चयति सृष्ट्वेति स्वप्नदृग्यथा स्वविद्याचेष्टिते दृष्टान्तः ॥ ३० ॥ त्रिगुणत्वेन जीववत्तदभिभूताय किंतु गुणानामात्मने नियन्त्रे ॥ ३१ ॥ वरं वृणीष्वेति यदुक्तं तत्राह किमिति वरं वरं दर्शनं यस्य तस्मात्त्वत्तः ॥ ३२ ॥ परं वरं तव गुणो यस्य तव दर्शनात्पूर्णकामः सर्वानन्दसन्दोहरूपः सत्यकामः यथेष्टप्राप्तसर्वानन्दः ॥ ३३ ॥ वरदानाय स्व।

संवदिष्याम: संवादं करिष्याम: सा वर्तो गाति नेह हेतु: ईशान इति ॥८॥ रुद्राधिपेयोत: कारणास्य हृदये येन स ॥९॥ न केवलं बहिरेवान्तर्यपि शम्भो शिवं विचरन्तं विस्मितः कथं प्रान्ते सहसा अकस्मादेव हृदि भाते तडिद् इव शिशा गजदाधारयतीति तेजो गौरवली शिरसि तं मूलादिभिः सहस्रग्रन्तमालादीनि विभ्राण मिति अन्वयः स्रग्दमालादीनां द्वंद्वे कं ॥

सूत उवाच ॥ इत्युक्त्वा तं तु पेयाय भगवान् स्वात्मतां यतिः ॥ ईशानं सर्वविद्यानामीश्वरः सर्वदेहिनां ॥८॥ न योगागमनेसा लाह्यो यो जगदात्मनः ॥ न वेदकृद् द्वयी वृत्तिरात्मने विश्वमेव च ॥९॥ भगवांस्तद्भिताय विविशो यो गमायया ॥ आविशान्तं हृत्ताकाशं वायुः छिद्रमिवेश्वरः ॥१०॥ आत्मन्यपि शिवं प्रान्ते तडित्पिंगजटाधरं ॥ त्र्यक्षं दशभुजं प्रांशुमुद्यन्तमिव भास्करं ॥११॥ व्याघ्रचर्माम्बरं शूलधनुर्बाणासि चर्मभिः ॥ अक्षमालाडमरुक कपालपरशुं सह ॥ बिभ्राणं सहसा भान्तं विचक्ष्य हृदि विस्मितः ॥१२॥ किमिदं कुत एवेति समाधेर्विरतो मुनिः ॥ नेत्रे उन्मील्य ददृशे सगणोमं समयागतं ॥१३॥ रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः ॥ तस्मै सपर्यां व्यदधात्सगणाय सहोमया ॥१४॥ स्वागतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः ॥१५॥ आह त्वात्मानुभावेन पूर्णकामस्य ते विभो ॥ करवाम किमीशान येनेदं निर्वृतं जगत् ॥१६॥ नमः शिवाय शान्ताय सत्वाय प्रमृडाय च ॥ रजोजुषेऽथ घोराय नमस्तुभ्यं तमोजुषे ॥ एवं स्तुतः स भगवानादिदेवः सतां गतिः ॥ परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत ॥१७॥

विस्मयपूर्वकं बहिर्दर्शनमाह ॥ किमिदमिति सोमया उमया सह आगतं रुद्रं दृष्ट्वा ॥१३॥ ततो ननाम ॥१४॥ पूर्णकामत्वमस्यानुक्रियेन त्वया जगन्निर्वृतं भवतीति ॥१५॥ निर्गुण त्रिगुणात्मेम चनमस्करोति नमः शिवाय निर्गु

न मं तर्हितं श्रीभगवंतं ब्रुवटः सलिलं लोकसंप्लवं स्तुतिरोधाय श्वेतर्हितः स च स्वाश्रमे यथापूर्वं स्थित इति ॥ ३४ ॥ इति श्रीभावार्थदीपिकायां द्वादशस्कंधे नवमः ॥ ९ ॥ दशमे शिवसंवादो मार्कण्डेयमुने स्तुतिः वरदानं तेन साकं मतिः श्रीसा समामाध्य सभाजयन् ॥ ज्ञानकाँक्षा ज्ञानवत्सका श्रामान याति इजनं विनाविद्यो सोपि य स्यतवमाय याज्ञानि नो वय मिति श्र

सोऽपि

तमनघं वटोत्र स्तन्यालिलं लोकसंप्लवः ॥ तिरोधायि नगणाद् स्वस्वाश्रमे पूर्ववत् स्थितः ॥ ३४ ॥ इति श्रीभागवते द्वादशस्कंधे श्रीभगवन्मायादर्शनं नाम नवमोऽध्यायः ॥ ९ ॥ सूत उवाच ॥ स एवमनुभूयेदं नारायणविनिर्मितं ॥ वैभवं योगमायायास्तमेव शरणं ययौ ॥ १ ॥ मार्कण्डेयः ॥ प्रपन्नोस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे ॥ यन्मायया हि विबुधा मुह्यंति ज्ञानकाशया ॥ २ ॥ सूत उवाच तमेवं निभृतात्मानं वृषेणा दिविपर्यटन् ॥ रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ॥ ३ ॥ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत ॥ पश्येमं भगवन्विप्रं निभृतात्मेंद्रियाशयं ॥ ४ ॥ निभृतोदझषव्रातो वाताय ये यथार्णवः ॥ कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ॥ ५ ॥ श्रीभगवानुवाच ॥ नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये ॥ ६ ॥ अथापि संवदिष्यामो भवान्येतेन साधुना ॥ अयं हि परमो लाभो नृणां साधुसमागमः ॥ ७ ॥

हुंकारेणासुरं तीमर्थ ॥ २ ॥ श्रीनारायणः एवं स्वमायादर्शनश्रांतं शिववृषेण संवयामास तदा हसितितमेवमित्याद्रिना निभृतात्मा नेमसमाहितचित्ते रुद्राणीभावान्या ॥ ३ ॥ निभृतानि सुलानात्मेंद्रियाणि याः देहं द्रियमनांसि यस्य तं ॥ निभृतनिस्सलमुदकं झषव्रातस्वयस्मिन्नः ॥ संसिद्धिफलं साक्षात्कुरुष करोऽकरुयतो भवान्सिद्धिदः ॥ ५ ॥ आशिषः अभ्युदयलक्षणा उत स्वित अव इतः भक्तिमिति ॥ ६ ॥ ७

श्री· भा· टी· २५

कृत्वशोदर्शनं प्रवेशयति ॥ एवमित्यादिना क्रमोदिशः पुरतोगाकवंशस्थलेदानुं ॥ यो कृत्वानिश्राश्रमांश्चवर्णाश्चते यावृत्तीश्चंमर्यः ॥ २७ ॥ नानायुगानिकल्पांश्च कल्पयंतितेवीकल्पनइति ॥ तथानेकालेचसदिवपरमार्थइवसव भासितंतेनैव ॥ २९ ॥ वटपत्रेतंकंबालंपतत्स्यमेमासम्यादिस्पस्मितश्चैकेवपानादिरीक्षणेननिरीक्षितः ॥ ३१ ॥ अथयंते

कराव्२८

एवंवोदसीभगवाणानडिमातवान्नीयास्सवर्षान्ताक्रमः स्वरास्वरान् ॥ वनादिदेशान्सवितः पुर्वादिवेदा न्वतानाश्रमवर्णाहितनयः ॥ २८ ॥ महांलिभूतान्यथमौतिकान्यसौकालेचनानायुगाकल्पकल्पनं ॥ य त्किंचिदस्यव्यवहारकारणंददर्शविश्वंसदिवावभासितं ॥ २९ ॥ हिमालयंपुष्पवहांचतानदीस्ति जाश्रमयत्रमहर्षीश्रयस्थयत ॥ विश्वंविपश्यानस्यमितांत्रिशो वैवहिर्निरस्तोम्यपतल्लयाब्धौ तस्मिन्नृथिव्याः ककुदिप्ररूढवटच्छतन्ययावुदेशयानं ॥ तोकंचतत्प्रेमसुधास्मितेननिरीक्षितोपो गनिरीक्षणेन ॥ ३१ ॥ अथतंबालकंवीक्ष्यनेत्राभ्यांधिष्ठितंहृदि ॥ अभ्ययादतिसंक्लिष्टः परिष्वक्तुम धोक्षजं ॥ ३२ ॥ तावत्सभगवान्साक्षाद्योगाधीशोगुहाशयः ॥ अन्तर्दधेऋषेसद्योयथेहानीशनिर्मि ता ॥ ३३ ॥ ॥ राम

बालकमधोक्षजंपरिष्वक्तुमभ्ययादितिद्वयोरन्वयः कथंभूतंनेत्राभ्यांहृदिधिष्ठितंध्यातं ॥ ३२ ॥ तावत्परिष्व गलाभात्पूर्वमेवऋषेस्तस्यान्तर्हितोबभूवतत्रदृष्टमेवफलंदृष्टान्तः अनीशोनिर्दैवःतेननिर्मिताईहा क्रीडायथेति ॥ ३३ ॥ ॥ ॐ नमस्मैरामात्मनेनमः ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

61

२५

तस्य ईशानदिक्कोणस्थायी शिशुमपि ॥२०॥ श्रीमद्गुप्तवदनपंकजं यस्य तं कं बुवत् त्रिरेखाहतग्रीवायस्य स्कंधहोरस्कं विशालवक्षस्स्थलं तासां शोभनतानामालयस्थानं स्कंदं वंदे प्रभुं वीक्ष्य स्थितं ॥२२॥ स्वा सैकत कोशे सैः पंजंतः कं पद्मानाः कं पद्मा अलकाः तारा भानं पुष्पाणि तं कं बुवत ॥ अत्र वलये नखीः ययोनयोः कर्णायोः कुंडिम ॥ प्रलंबेसस्य तं विद्रुमतत्वाभान याई घत शोणामयितं स्वधानं ललितंयस्य तं ॥२३॥ पद्मगर्भवित आसस्य मानं ॥ अरुणमवयोनोतंजोनोयस्य तस्य

प्रायुक्तरसां प्रास्वायां तस्मिन्दृष्टो शिशुं ॥ शयानं पर्यायुदके प्रसन्नं भयातमः ॥२५॥ सहासमुखकतनुपम

म२ मंश्रीमद्वदनपंकजं ॥ कंबुग्रीवं महोरस्कं स्तनांसं स्कंदवत्सुं ॥२२॥ स्वासैजनकुलं कामानं कं बुश्रीकर्णादि डिमं ॥ विद्रुमाधरस्वासे षट्कोणयितनयास्मितं ॥२३॥ पद्मगर्भारुणपाणिपादं यहासावलोकनं ॥ स्वासेजद्वलिसंविग्नविम्नाभिदलोदरम् ॥२४॥ चार्वंगुलिस्फपाणिस्यं उरुजीयवयांम्बुजे ॥ मुखे निधाय विप्रेन्द्रौ यं तं वीक्ष्य विस्मितः ॥२५॥ तद्दर्शनात्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनांबुजः ॥ प्रहृष्टरोमाद्भुतभावशंकितः प्रष्टुं पुरस्तं प्रससार बालकं ॥२६॥ तावच्छिशोर्वै श्वसितेन भार्गवः सोंतः शरीरं मशको यथाविशत् ॥ तत्राप्यदोन्यस्तमचष्ट कृत्स्नशो यथा पुरामुह्यदतीवविस्मि

यो हासो यस्मिन् तदवलोकनं यस्य तं ॥ स्वासैर्वेजंतः चलंतो वलयस्मिन्यर्द्धि स्वरेखाः ताभिः संविग्नाः चंचलानि म्नाभि राना सिर्य स्मि तदलवदस्वमपत्रसंकाशं उदरं यस्य तं ॥२४॥ चारवंगुलयोययोस्तामपानुरुंजीयत्रा कृष्यमयंनेपि वेतं ॥२५॥ हृत्पद्मं च विलोचनांबुजे च प्रोत्फुल्लानि नानि यस्य सः ॥ अद्भुतेन भावेन यत्पाश्चर्यं तेन तेन शंकितः सन्नपि प्रष्टुं पुरः प्रससार समीपे गतः ॥२६॥ अदः इदं जगत् यथा पूर्वं प्रलये लयात्पूर्वं यत्तं विमस्तं दृष्टवान्

म२ टी० १२

जैव विलसितः समन्तभद्रस्य १२

आत्मना सह जरायुजादि चतुर्विधं जगदंतर्बहिश्चाद्भिरुपतापितं वीक्ष्य क्ष्मां च जलाप्लुतां वीक्ष्य मुनिः समत्रसत भयं प्रापके
नोपतापितं अद्भिः कथंभूताभिः अतिक्रांता द्यौर्याभिः खरैस्तूर्यस्य रश्मिभिर्वायुभिर्वेति शेषः शतह्रदाभिर्विद्युद्भिः
दीर्घमार्षं छंदोनुसारेण ॥४॥ प्रभंजनेन वायुनाघूर्णितं प्रकंपितं वाः उदकं यस्मिन्नतः आपूरयात् छादयामास समं

अंतर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभीरुपतापितं जगत् ॥ चतुर्विधं वीक्ष्य सहात्मना मुनिर्जला-
प्लुतां क्ष्मां विमनाः समत्रसत् ॥५॥ तस्यैवमुद्वीक्षत ऊर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः ॥ आ-
पूर्यमाणो वर्षद्भिरंबुदैः क्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः समं ॥६॥ सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलो-
क्यमासीत्सह दिग्भिराप्लुतं ॥ स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य जटा जडांधवत् ॥७॥ क्षु-
त्तृट्परीतो मकरैस्तिमिंगिलैरुपद्रुतो वीचिनभस्वताहतः ॥ तमस्यपारे पतितो भ्रमन्दिशो न
वेद खं गां च परिश्रमेषितः ॥८॥ क्वचिद्गतो महावर्ते तरलैस्ताडितः क्वचित् ॥ यादोभिर्भक्ष्यते क्वा-
पि स्वयमन्योन्यघातिभिः ॥९॥ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयं ॥ क्वचिन्मृत्युमवाप्नोति
व्याध्यादिभिरुतार्दितः ॥२०॥ अयुतायुतवर्षाणां सहस्राणि शतानि च ॥ व्यतीयुर्भ्रमतस्तस्मिन्विष्णु-
मायावृतात्मनः ॥२१॥ स कदाचिद्भ्रमंस्तस्मिन्पृथिव्याः ककुदि द्विजः ॥ न्यग्रोधपोतं ददृशे फलपल्लव-

सह ॥१६॥ सक्ष्मांतरिक्षं सभुवं तदंतरिक्षस्थप्राणिगणसहितं सदिवं स्वर्गस्थदेवसहितं भागणज्योतिर्गणाः तैः सहितं जु-
टा विक्षिप्य विकीर्य ॥१७॥ परिश्रमेण इषितः गतः व्याप्त इत्यर्थः ॥ श्रम एव गाढं यस्माद्धातोः ॥१८॥ अन्योन्यघाति-
भिः तद्गतान्योन्यपरं युध्यद्भिः ॥१९॥ विष्णुमायावृतात्मन इति सततया देहवानित्यर्थः ॥२१॥ ककुदि उन्नतप्रदेशे स्म

यस्य तव श्रीसमादाक्षुदर्शनं मन सा गृहीत्वा प्राप्य प्राकृता अपि जादयो भवंति स भाबात्मोद गोचरो जातोस्ति किमतः
परं वरेणास्यर्थ ॥ ५ ॥ इति हृष्टा मिक्षा मिलोकपा लैर्ब्रह्मादिभिः साद्धि तोयं लोकः जनः सद्धिंदो सतिवस्तु तिभेदेय
यति ॥ ६ ॥ तथेति इत्यसीतिस्मयन ॥ सर्वेश्वरः प्रागात पावा तवे क्रिया विशेषयां ॥ ७ ॥ नसैवार्थं मायादर्शनं नृपं प्र।
ग्मादिस्मूर्तिषु ॥ ८ ॥ भावद्वैर्मनो मयद्वैः क्वचि त्कदा विश्वे मप्रसवसंप्लुतः प्रेमोद्र्केष्याम ॥ ९ ॥ मायादर्शनस्या

गृहीत्वाज्जादयो यस्य श्रीमायादाक्षुदर्शनं ॥ म ॥ सायोग एकोन सप्ता वान्मेत्तवो वरः ॥ ५ ॥ अथापि बुज
पक्षात्मुगएप्लोके शिरवामणे ॥ इति सायांयया बोकः सपालो वेदसद्दिदां ॥ ६ ॥ हतोडितो यितः कामेश्व
धिया भगवान्मुने ॥ तथेति सस्मयन्या बाइयर्थाश्रमसीश्वरः ॥ ७ ॥ नसैव चिंतयन्नर्थं कृषिः स्वाश्रमए
वस ॥ वसन्नग्न्यर्कसोमा त्रुभूवायुवियदात्मसु ॥ ८ ॥ ध्यायन्सर्वत्र चहरिं भावुद्रव्यैरपूजयत ॥ क्वचित्पू
जां विसस्मार प्रेमप्रसरसंप्लुतः ॥ ९ ॥ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुनेः ॥ उपासीनस्य संध्यायां
ब्रह्मन्वायुरभून्महान ॥ १० ॥ तं चंडशब्दं समुदीरयंतं बलाहका अन्वभवन्करालाः ॥ अक्षस्थविष्ठा मुमु
चुस्तडिद्भिः स्वनं तमस्यैरभिवर्षधाराः ॥ ११ ॥ ततो व्यदृश्यंत चतुः समुद्राः समंततः क्ष्मातलमाग्रसे
तः ॥ समीरवेगोर्मिभिरुग्रनक्रा महाभयावर्तगंभीरघोषाः ॥ १२ ॥ ॥ १ ॥ रामाय नमः ॥ ॥

हतश्चेत्यादिना ॥ १० ॥ तं वायुमनु बलाहका मेघा अनुभवन ॥ आविर्बभूवुः ते च तडिद्भिः सहिताः उच्चैः स्तनंतः गर्जंतः अ
क्षस्थविष्ठा अतिस्थूला वर्षधारा मुमुचुः ॥ ११ ॥ वर्तमानाः समुद्राः समीरवेगोर्मयः तेषां
तेर्भूतलं ग्रसंतः उग्रा नक्रा येषु महाभया आवर्ता येषु गंभीरो घोषो येषु ते च ॥ १२ ॥

वेदेनैव तत्त्वावबोधमित्युपपादयन् प्राणांतीतिवक्त्रानंतवदर्शनेनिवर्तमेतयांतिकथ्यं मूलामानमनतत्त्वबृहत्स्वप्रका
शकं प्रमाणमुक्तं स्तुत्वा आह ॥ अन्न पश्यन्त्यबलमन्त्यैः कवयोऽपि यमात्मयोगादिभिर्यतमाना नाथ च न यि सुक्त्येति किन्तु
आह सर्वेषु मायामोहितो देहादिवाचानाविविषयभेदादयः ॥ ते भां प्रति रूपं तत्त्वं नुमावशीनील समांवापर्यनैकृत ॥ आत्मनादि
मतानेनैनिगूढबोधापायपरतमेवं भूतं महापुरुषं नतोऽस्मि ॥४॥ इति श्रीभागवते द्वादशेऽष्टमः ॥ नवमे भगवन्माया

यद्दर्शनं निगमआत्मरहःप्रकाशं मुह्यंति यत्र कवयोऽजपरा यतंतः ॥ तं सर्ववादविषयप्रतिरूपशी
लं वंदे महापुरुषमात्मनिगूढबोधं ॥४९॥ इति श्रीभागवते द्वादशेऽष्टमोऽध्यायः ॥८॥ सूत उवाच ॥ सं
स्तुतो भगवानित्थं मार्कंडेयेन धीमता ॥ नारायणो नरसखः प्रीत आह भृगूद्वहं ॥१॥ श्रीभगवानु
वाच ॥ भो भो ब्रह्मर्षिवर्योऽसि सिद्ध आत्मसमाधिना ॥ मयि भक्त्यानपायिन्या तपःस्वाध्यायसंय
मैः ॥२॥ वयं ते परितुष्टाः स्म त्वद्बृहद्व्रतचर्यया ॥ वरं प्रतीच्छ भद्रं ते वरदेशादभीप्सितं ॥३॥ ऋषिरुवा
च ॥ जितं ते देवदेवेश प्रपन्नार्तिहराच्युत ॥ वरेणैतावतालं नो यद्भवान्समदृश्यत ॥४॥

दिदृक्षोर्दर्शनं मुक्तः मायाशिशुर्लीलया यो चमनेनिर्वेशानिर्गमैः श्रीभगवतः परितोषपूर्वकं तद्दर्शिति
नव मुदावांकण्ठनेतमाह संस्तुत इत्यादिना ॥१॥ आत्मसमाधिना चित्तैकाग्र्येण ॥२॥ वयं परितुष्टाः स्मेति वक्तु
वचनं सर्वदेवाभिप्रायेण वरदेशादिति एकवचनं तु पौरुषाभिप्रायेण प्रतीच्छ गृहाण ॥३॥ वरेणालं दर्शितानां
यावितं उक्तं पादर्शितः ॥ समदृश्यत दृष्टवानस्मीति ॥४॥ ॥ ॥

न्यश्च पालनाय तु पि सत्त्वैव मूर्ती अतो मा सेवकं मंतं न माद्रियसे तत्राह ॥ सत्त्वमिति यद्यपि यद्यपि तवैव मायाकृता
पतालीलाः तथैव धृताः । तथापि या सत्त्वमयी सैव प्रशांत्यै नान्ये केवलं सत्त्व प्रशांत भावमात्रं मन्मभजनेन कि
त निष्टुं च किंचिदप्यपात भवेदित्याह व्यसनेति ॥ ४५ ॥ तदेव सद्वाचोरहताह ॥ यस्मादिति हे भगवन् तव तनु
त्वां तत्तु श्रीमन्नारायणाख्यां मध्ये च तव भक्तानां च शुक्लां तनुं स्वदयितां कुशलाः भजन्ति ॥ तामेव तत्त्वमेव पुरुषस्य पादौ स्वरू
पं रूपमुशंति सत्त्वेन ब्रह्म रजस्तमसी त्रिजन्ति इतः यतः सत्त्वात् लोको वैकुंठाख्यः लोकात्तेन सत्त्वप्रथमं यद्वा भोग

सत्त्वं रजस्तम इतीश तवात्मबंधो मायामयाः स्थितिलयोदयहेतवोस्य ॥ लीला धृता यदपि सत्त्वमयी प्रशांत्यै ।
नान्ये नृणां व्यसनमोहभियश्च याभ्यां ॥ ४५ ॥ तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां
कुशला भजंति ॥ यत्सात्वताः पुरुषरूपमुशंति सत्त्वं लोको यतोभयमुतात्मसुखं न चान्यत् ॥ ४६ ॥ तस्मै
नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदैवताय ॥ नारायणाय ऋषये च नरोत्तमाय ॥ हंसाय सं
यतगिरे निगमेश्वराय ॥ ४७ ॥ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्वकेष्वसुषु हृद्यपि दृक्पथेषु ॥ त
न्मायया वृतमतिः स उ एव साक्षादाद्यस्तवाखिलगुरोरुपसाद्य वेदं ॥ ४८ ॥

सत्यपि आत्मसु खं वेच ॥ ४६ ॥ अत सं प्रणमति तस्मै नम इति हंसाय शुद्धाय संयतगिरे नियतवाचे प्रवृत्तिनिरोधाय
वा येवेदमार्गप्रवर्तकाय ॥ ४७ ॥ वेदार्थं संप्रदायप्रवर्तनेहेतुं तं वदन्नौति यमिति के रिं हृदि ये मार्गे भ्रमद्धी विति
धीः पुमान् स्वीयेषु इंद्रियादिषु नियंतत्वेन संतमपि तान् वेद दृक्पथेषु विषयेषु बुद्धि विपक्षे हेतुः तन्मायया तस्य
तवैव मायया आवृता आत्मनि या मतिर्यस्य सः ॥ स एव मायया पूर्वं मत्तो तवाखिलगुरोस्तवत्स्तवतिं वेद
मुपसाद्य संप्राप्य तं त्वां साक्षाद्वेद ॥ ४८ ॥

श्री॰
भाग॰
टी॰
२९

यस्मादेवंभूतस्त्वं तस्मात्तवांघ्रिमूलं भजामीत्याह तस्मा इति तस्मा अवितः पालकस्य स्थावरजंगमात्मनो विश्वस्य भजामीति तत्
तीयस्त्रीकस्यानुषंगः कथंभूतं सोंघ्रिमूलं यत्स्थं यत्र विस्तो स्थितं कर्मगुणकालात्मकं रजो मलं प्रपंचवर्जिताः तापा
दयो न स्पृशंति रुज इति पाठे रोगाः वेदा हृदये येषां ते वेदहृदया वेदविदो मुनयः यदेव स्तुवंति निनमंति नितरां नमंति ततु तत्प्राप्तये
एव स्तुवंति विजयंति ॥५५॥ यत अन्यः पुरुषार्थो नास्तीत्याह नान्यमिति अंघ्र्युपनयनात् ॥ आश्रयणात् श्रीमच्चरणाश्रयेः प्रयत्ने
मेन विभः परितः सर्वेष्वपि लोकेषु भीर्यस्य तस्य जनस्य देवाह द्विपरार्धे परिमितान्येव स्वभावः ब्रह्मापि ते कालस्य त्व
भ्रूविजृंभत्पादले बिभेति अतः किमुत वक्तव्यं तेन ब्रह्मणोत्पन्नानां भौतिकानां प्राणिनां भयमिति ॥५६॥ यस्मा

तस्मा अवितः स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणकालरजः स्पृशंति ॥ यद्वै स्तुवंति निनमंति यजंत्य
भीक्ष्णं ध्यायंति वेदहृदया मुनयस्तदाप्त्यै ॥५५॥ नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितोभि
य ईश विद्मः ब्रह्मा बिभेत्यलमतो द्विपरार्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानां ॥५६॥ यद्दे
भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुर्वोः परस्य ॥ देहाद्यपार्थमसदंत्यमभिज्ञमात्रं
विंदेत ते तर्हि सर्वमनीषितार्थं ॥५७॥ ॥

देवं तत्तस्मात्तव पादमूलं भजामि कथंभूतस्य ऋतधियः सत्यं ज्ञानस्वरूपस्य यद्वा सुत्याधीर्यस्य यस्मिंस्त्वा तस्मा।
त्मगुरोः जीवनियंतुः अतः कारणात्सर्वस्य किं कृत्वा आत्मच्छदि आत्मावरकं अपार्थं वा अपगतोर्थः निष्फलमि
त्यर्थः असच्च तच्छमस्यचेनस्वरमिदं देहादि हित्वा देहादि हित्वा यस्मात् असेव्य तत्कथं प्रतीयते तत्राह ॥ अभिज्ञा।
मात्रं तदृष्ट्यैव तमसतः ॥ किं तदात्मसात्वेन ततः पृथगस्तीत्यर्थः नन्वपवर्गाय भवतु महत्त्वं फलांतरार्थं तव
भजनं कार्यमेव तत्राह ॥ तर्हीति यदि त्वां भजति पुरुषः तर्हि तेनैव त एव मनीषितमर्थं विंदतेति ॥५७॥ ॥

आश्लिष्यन्नालिंगयन्निव ॥ ३५ ॥ पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेनार्घ्येण ॥ ३६ ॥ पाद्यादानन्तरं दिष्ट्या सुखमनसौ तौ प्रति
अनयोः सन्निधानमात्रेण प्राणादिप्रवर्तकत्वात् ॥ आत्मनैवैतत्ताभ्यां स्थानं यस्य तदाह किं मिति विभो तव वर्णये किं महत्वं वर्ण्यं
यत्कर्तृत्वं सर्वस्य येन त्वया प्रेरितोऽसुः प्राणः संस्पन्दते प्रवर्तते तमनु वागादयः संस्पन्दन्ते अतश्चेष्टते वैष्णव
यद्यपि देवानामात्मा आत्मसिद्धिश्च तिसृणामपि सिद्धमित्यर्थः न केवलं प्राकृतानां तनुभृतां किन्त्वजशर्वयो
श्च स्वस्याप्ययमपि अतः स्वस्य मनागपि तव स्वरूपं वर्णयितुं न शक्तिः तथापि भजतां भावबन्धुः स्वयं भवता प्रवर्तिता

उत्थाय प्राञ्जलिः प्राह दीनवत्कृताञ्जलिराश्लिष्यन्निव ॥ नमोनमस्तेऽस्तु शान्तायैव भावायेव कृतान्तरः ॥ ३७ ॥ तयोरासन
मादाय पादयोरवनिज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥ ३८ ॥ सुखमासनमासीनौ प्रसा
दाभिमुखौ मुनिः ॥ पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥ ३९ ॥ मार्कण्डेय उवाच ॥ किं वर्णये तव वि
भो यदुदीरितोऽसुः संस्पन्दते तमनु वाङ्मन इन्द्रियाणि ॥ स्पन्दन्ति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथा
पि भजतामसि भावबन्धुः ॥ ४० ॥ मूर्ती इमे भगवतो भगवंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजि
त्यै ॥ नाना बिभर्ष्यवितुमन्यतनूर्यथेदं सृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः ॥ ४१ ॥

अपि वागादिभिः भजतां पुंसां भावबन्धुः आत्मबन्धुः पुरुषसिन्नपि च दिव्यदेहबन्धुः अहो कृपालुतानन्वेतदर्थः ॥ ४० ॥ न
नु कथमात्मा प्राणादिप्रवर्तकोऽत्र मम पुत्रत्वादावयोरिति चेत्तत्राह ॥ मूर्ती इति हे भगवन् ॥ भगवतस्तव इमे मूर्ती त्रि
लोक्याः क्षेमाय पालनाय तापविरमाय च मृत्युजित्यै मोक्षाय च ननु त्वं कस्मात् पृथक् इत्यर्थः ॥ अत एव
तः यथेदं विश्वमवितुमन्या अन्यतनूर्मत्स्यकूर्मादिलक्षणाः नानाप्रकारा बिभर्षि तद्वत् न केवलं पालन
दिमात्रं तव कर्म किन्तु स्वस्य लीलया स्वपीयोऽसृष्ट्वा तथापि ग्रससि संहरसि यथोर्णनाभिः ॥ ४१ ॥ ॥ ॥

सर्वं तेषां कर्म तत्र तस्मिन्मोघं व्यर्थं ॥ अनीशस्य असमर्थस्य ॥ २७॥ मुनेर्वपुः ऊर्ध्वंतः अग्निकुल्यमाचरंतः हे मुने शौनक
ब्रह्मसः अहंकारस्य भावं विकारं ॥ २९॥ तावत् कुर्वाणायति हरमा ॥ सोऽयं कृत्वा जितवल्कले वायुं वेचयद्यो स्तोप
वित्रपाणी यद्योस्तौ त्रिवृत्तंत्रिगुणं नवतंतुकमिति त्रिवारिवृद्धिः एकस्मान्निमित्ताद्धेन च तत्वादिमय ॥३३॥ वेदं

विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः ॥ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः ॥२७॥ त उत्तमप
कुर्वंतो मुने स्तत्तेजसा मुने दह्यमाना निववृतुः प्रबोध्याहिमिवार्भकाः ॥२८॥ इतींद्रानुचरैर्ब्रह्मन्ध
र्षितोऽपि महामुनिः ॥ यन्नागादहमो भावं न तच्चित्रं महत्सु हि ॥३०॥ दृष्ट्वा निस्तेजसं कामं सगणं
भगवान्स्वराट् ॥ श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परं ॥३१॥ तस्यैवं युंजतः चित्तं तपः स्वाध्या
यसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणो हरिः ॥३२॥ तौ शुक्लकृष्णौ नवकंजलोचनौ चतुर्भु
जौ रौरववल्कलांबरौ ॥ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवं ॥३३॥ पद्माक्ष
मालामुत जंतुमार्जनं वेदं च साक्षात्तप एव रूपिणौ ॥ तपत्तडिद्वर्णपिशंगरोचिषा प्रांशू दधा
नौ विबुधर्षभार्चितौ ॥ ३४ ॥ ते वै भगवतो रूपे नरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्ननामां
गेन दंडवत् ॥ स तत्संदर्शनानंदनिर्वृतात्मेंद्रियाशयः ॥ हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं
॥३५॥

च दर्भमुष्टिं च किंच साक्षात्तप एव तौ तत्र हेतुः तपत्तडिद्वर्णदीप्यमानं विद्युत्सकाशं यत्पिशंगं गोविस्ते
न ॥ रूपिणौ मूर्तिमंतौ तात्रकं जीयुक्तमूर्तिः पानपामयत्वेन प्रकाशमाना विबुधर्षभाः ॥ आप्यूत्थाय तौ ॥ ३४॥ उच्चै
र्महता आदरेण ॥ ३५॥ तयोः संदर्शनेन यत् आनंदः तेन निर्वृताः उपशांताः आत्मेंद्रियाशयाः देहेंद्रियमनां
सि यस्य सः नसेहे नाशक्नोत ॥ ३६॥ ॥ राम ॥

बृहद्व्रतधरः ॥ नैष्ठिको ब्रह्मचारी सन् ॥ ५ ॥ नियमन्नूयं यमं नूनं ये ब्रह्मादिभुअंजसह विमर्चयन् ॥ ६ ॥ मेत्यं गुर्वर्थ
दुस्यतेनानुत्तातः चेतनर्दिवुभुजे चेतत्कदाचिदु पोषितो भवति ॥ ७ ॥ तेन मूत्रजपेन ॥ ८ ॥ धर्म्याविधिमिता क्लेशा
रागादयो यस्य तेनांतरात्मना प्राप्याहतेनमनसा ॥ ९ ॥ नमस्यतपोनि ह्यामि निहाले नवाणि यति ॥ यतदित्मानोऽस्मि

बृहद्व्रतधरः शांतो नदिलो वल्कलांबरः ॥ विभ्रत्कमंडलुं दंडं मृगाजिनमभेवलं ॥ कृशाजिनं मात्र
मूत्रकं शास्त्र नियमैर्युतः ॥ अप्सर्कं मूत्र विप्रान्स सर्वं पुमान्त्य योऽहंनि ॥ ३ ॥ वायुं प्राणैः मुगरवेमैदस्याहस्म
वाण्यतः वुभुजे गुर्वनुत्तातः मृत्तिकाचिड पोषितः ॥ ४ ॥ एवं तपः साध्यायपरस्य यो मामपुनापुने आयाय
पनृषीकेशं जितेप्य मृतं संबंड जेप्य ॥ ५ ॥ वर्णं मृगर्भं वाहत्या वल्मपुत्राश्वयेपरे ॥ मूढवपितं भूतानि तेन सु
न्निति विस्मिता ॥ ६ ॥ इत्थं बृहद्व्रतधरः तपः साध्यायमेवमे ॥ दृष्टा वधोतं तं यो वीधक्त क्लेशतमा
मूना ॥ ७ ॥ नसौ वैयुजतः चित्रं महायोगं नयोगिनः ॥ अतीयाय महाकालो मन्वंतरमयात्मकः ॥ ८ ॥ पुन
सुरदरोज्ञातास्मनमेस्मिन्निलानवे ॥ तपो विशंकितो ब्रह्मन्नारेभे न दिवा तन ॥ ९ ॥ गंधर्वाप्सरसः कामव
संतमलयानिलो ॥ मुनये प्रेषयामास रजस्तोकमदो तथा ॥ १० ॥ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे
पुष्पभद्रा नदी यत्र चित्राख्या च शिला विभो ॥ ११ ॥ तदाश्रमपदं पुण्यं पुण्यद्रुमलतांचितं ॥ पुण्यद्विजकुला
कीर्णं पुण्यामलजलाशयं ॥ १२ ॥

स्मस्मेमन्वंतरे तपसा मत्पदं ग्रहीष्यतीति विशंकितः ॥ १ ॥ मुनये मुनिं मार्कंडेयं प्रेषयितुं रजस्तोकं मद्यपि प्रियं लो
भः मदस्वतौ ॥ ११ ॥ तदाश्रमपदं प्रविष्टो वायुर्वा विविति ततीयेनाव यः ॥ पुण्यद्रुमैर्लताभिश्चाचितं ॥ पूजितं पुण्यं ।
द्विजानां मृगाणां कुलैराकीर्णं पुण्या आश्रममलाजला यस्मिन ॥ १२ ॥

इति श्रीभावार्थदीपिकायां द्वादशे सप्तमः ॥ ७ ॥ प्रसङ्गेनैव तपसा यथा मार्कण्डेयस्य मोहकैः कामादिभिरसंमोहो नरनारायण
स्तुतिः ॥ पुराणविभागप्रसंगेन पुराणेषु मार्कण्डेयस्य चरितं प्रस्तुतमाह स्म ॥ तत्र मेवं वक्ष्यमाणप्रश्नमाह त
मसि संसारे भ्रमतां पारदर्शनः ॥ तन्निवर्तक ॥ १ ॥ प्रश्नमाह आहुरिति उर्वरितः प्रलयेऽपि स्थितः एकस्मात्कल्पान्ते तपते क
पंचरहते इत्येकः प्रश्नः ॥ २ ॥ पूर्वश्लोकान्नावान्तरमाह ॥ स वा इति यतो भार्गवर्षभः कोपि प्रलयनैमित्तिको वा
प्रमदपांचदितमेवमाह एके वर्तितो लोकवालकः ॥ ४ ॥ कौतूहलकौतुकमेवालोकनमयार्थी ॥ किं तु पुराणेष्वपि

इति श्रीभागवते द्वादशे सप्तमोऽध्यायः ॥ ७ ॥ शौनक उवाच ॥ सूत जीव चिरं साधो वद नो वदतां वर तमस्यपारे
भ्रमतां नृणां त्वं पारदर्शनः ॥ १ ॥ आहुश्चिरायुषमृषिं मृकण्डुतनयं जनाः ॥ यः कल्पान्ते ह्युर्वरितो येन ग्रस्त
मिदं जगत् ॥ २ ॥ स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन्भार्गवर्षभः ॥ नैवाधुनापि भूतानां संप्लवः कोऽपि जा
यते ॥ ३ ॥ एक एवार्णवे भ्राम्यन्ददर्श पुरुषं किल ॥ वटपत्रपुटे तोकं शयानं त्वेकमद्भुतम् ॥ ४ ॥ एष नः
संशयो भूयान्सूत कौतूहलं यतः ॥ तं नश्छिन्धि महायोगिन्पुराणेष्वपि संमतः ॥ ५ ॥ सूत उवाच ॥ प्रश्नस्त्व
या महर्षेऽयं कृतो लोकभ्रमापहः ॥ नारायणकथा यत्र गीता कलिमलापहा ॥ ६ ॥ प्राप्तद्विजातिसंस्का
रो मार्कण्डेयः पितुः क्रमात् ॥ छन्दांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥ ७ ॥

नात एवेन संमतः ॥ ५ ॥ प्रश्नं समभिनन्दति हे महर्षे शौनक अयं प्रश्नः ॥ तत्र हेतुः नारायणकथा यत्र प्रश्नविषये ॥ ६ ॥ तत्र मा
र्कण्डेयः तपसा श्रीभगवन्तमाराध्य मायां द्रष्टुं वरं वव्रे ततः स तेन वरेणैव भगवन्मायया प्रापितं सप्तकल्पान्ते दुःखं
नानाविधमनुभूय वटपत्रपुटे शयानं तोकमपश्यदित्याह ततो मार्कण्डेयस्य मायादर्शनमिति पूर्वं पश्चात्तपसा
च मस्त्यो केनापि तपःसंग्रहेण तत्तपश्चर्या ॥ का व्याख्याते प्राप्तो द्विजातिसंस्कारः उपनयनाख्यो येन ॥ नमः पि

अपाश्रयमाह व्यतिरेकेति जाग्रदादिषु अवस्थासु जीवतया वर्तत इति जीववृत्तिषु यो विसृष्टैतैः नमस्कात्वा ॥ तेषु माया
मयेषु सात्विकेषु आत्मघः समाध्यादौ च व्यतिरेकोपसंगतं ब्रह्म समाव्रुत्तीत्यवाध्यवोपि ध्यानार्थमुक्तमपाश्र
यं तच्छब्दार्थः ॥ १९ ॥ तदेव स्पष्टयति प्रपंचयति पदार्थेष्विति जाग्रदादिषु द्रष्टमुहादिद ध्यावृत्त्यावृत्तं तत अनुवृत्तं
च व्यतिरेकाव्यवस्थानात् तद्रूपतामसक्तं न्माह समताभेदप्ययापवृत्तिज गर्भाधान सामर्थ्यहेयां पंचानां ताताया तानां तदेह
स्यामनुत्तमपि ॥ अथ चिंतितं बैन साहितेन नयुतमयुतं च यदन्नदपाश्रय इति ॥ २० ॥ एवं दशापि लक्षणानि निरूप्यावर्ण्य

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ॥ मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥ १९ ॥ पदार्थेषु यथा
द्रव्यं सन्मात्रं रूपनामसु ॥ बीजादिपंचतान्तासु ह्यवस्थासु युतायुतं ॥ २० ॥ विरमेत यदा चित्तं हित्वा वृत्ति
त्रयं स्वयं ॥ योगेन वा तदात्मानं वेदेहाया निवर्तते ॥ २१ ॥ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः ॥ मुनयोऽष्टा
दश प्राहुः क्षुल्लकानि महान्ति च ॥ २२ ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं ॥ नारदीयं भागवतमाग्ने
यं स्कांदसंज्ञितं ॥ २३ ॥ भविष्यं ब्रह्मवैवर्तं मार्कंडेयं सवामनं ॥ वाराहं मात्स्यं कौर्मं च ब्रह्मांडाख्यमिति
त्रिषट् ॥ २४ ॥ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः ॥ शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविवर्ध
नं ॥ २५ ॥

यति ॥ महापुराणत्वे इति पुनः तदाह विरमेदिति यदा स्वर्गादीनां मायामयत्वानुसंधानेन वा मद्देवादेः स्वयमेव चित्तं
विरमेत ॥ दृष्टेवानुष्ठितेन योगेन वा देवकृतादिवत् तदा विक्षेपाभावात् आत्मानं वेद तदा च विद्यानिवृत्तेरीहा
याः चेष्टायाः संसाररूपाया निवर्तते इत्यर्थः ॥ २१ ॥ पुराणानि श्रीभागवतत्वेन लक्षयित्वा प्रासंगिक
मुक्ताप्रस्तुतमाह ॥ एवं विधलक्षणानि लक्ष्याणि ॥ २२ ॥ त्रिषट् अष्टादश ॥ २४ ॥ उपसंहरति ब्रह्मन्निति मुनेर्व्यास
स्य शिष्यादीनां ब्रह्मतेजो ॥ ब्रह्मवर्चसं तद्विवर्धनं श्रोतृणामिति शेषः ॥ २५ ॥ ॥

विसर्गमाचष्टे पुरुषेत्योश्वरेणानुगृहीतानामेतेषां महदादीनां पूर्वकर्मवासनाप्रधानोयं समाहारः कार्यभू
तः चराचरप्राणिरूपो बीजाद्बीजमिव प्रवाहरूपत्वाद्विसर्ग उच्यते इत्यर्थः ॥ ९ ॥ चराणां भूतानां सामान्यतो चराणि चक्रा
ख्वराणि कामादिति ॥ तत्र तत्र नृणां स्वेन भावेन कामात्वेदनपापिवायानियतावृत्तिः जीविका कृता मानुति कृत्य
त इत्यर्थः ॥ ३ ॥ तिर्यङ्मानुषदेवेषु मिथुनानां तासां तेषामीहानीलामामेव स्वभावतो जात इत्यर्थः येवम्नो वैदि
तिसमानानिःकृष्य कर्ष चित्संबधः अवीद्धि योदेना ॥ ५ ॥ यद्वि वनजानवाद्यश्यो यद्धि यत्रेवामनुविनिमनादयः

पुरुषानुगृहीतानामेतेषां वासनामयः ॥ विसर्गोयं समाख्यातो बीजाद्बीजं चराचरं ॥ ९ ॥ वृत्तिर्भूतानि भूतानां
चराणामचराणि च ॥ कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा ॥ ३ ॥ रक्षाच्युतावतारेहा विश्वस्यानुयुगे यु
गे ॥ तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः ॥ ४ ॥ मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः ॥ ऋषयोंशावतारा
श्च हरेः षड्विधमुच्यते ॥ ५ ॥ राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोन्वयः ॥ वंश्यानुचरितं तेषां वृत्तं वंश
धराश्च ये ॥ ६ ॥ नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ॥ संस्थेति कविभिः प्रोक्ताश्चतुर्धास्य स्वभाव
तः ॥ ७ ॥ हेतुर्जीवोस्य सर्गादेरविद्याकर्मकारकः ॥ यं चानुशायिनं प्राहुरव्याकृतमुतापरे ॥ ८ ॥

षडेते वर्गाः स्वस्वाधिकारेण यत्र वर्तन्ते तेन कालं तं तं मन्वन्तरमित्यर्थः ॥ ५ ॥ वंशमाह राज्ञामिति ब्रह्मप्रसूतानां ब्रह्मा सृष्टिर्येषां प्रवृत्ता ।
त्रिकालवर्त्तः तेषामन्वयो वंशः तेषां वृत्तं ये च तद्वंशधरास्तेषां चरितं वंश्यानुचरितमुच्यते ॥ ६ ॥ संस्थामाह नैमित्तिक इति स्वभावतोमा
यातो नित्यत्वप्रायद्वामायातोयप्यस्मृतत्विमेतल ॥ ७ ॥ हेतुं ॥ ७ ॥ अस्य जगतः सर्गादिहेतुर्निमित्तं जीवः सोत्र हेतुरुच्यत
इत्यर्थः तत्र अनुशायिनं निमित्तकेचित् ॥ अव्याकृतमिति अपरे तत्राह यमिति चैतन्यप्रधानेनानुशायिनं उपाधिप्रधान
मविवक्षतमसामव्याकृतं ॥ ८ ॥ २ तत्सर्वमिति तन्माह अविद्यया कर्मकारकाः कर्मकर्ता जीवादृष्टप्रयुक्तत्वाद्धि स

श्री
भा. टी.
२२

रामशिष्योऽकृतव्रणः ॥ एवं च त्रयो वयं मूलसंहिताध्ययनेन ततः संहिता बाहुभ्यां कृत्वितं ॥ ५ ॥ श्रीमत्कुकपरी
लिङ्गाननिर्दिष्टं वादे निरूपितमपि पुराणलक्षणं तोऽद्रे कथनाय दर्शयति ॥ ६ ॥ अस्याविश्वस्य अत्र सर्गो विसर्गश्च स्था
नं पोषणमूतयः मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रय ॥ इत्यत्रोक्ते स्थानपोषणे वृत्तिरक्षाशब्दाभ्यां उक्ते
उत्तराणि मन्वन्तराणि वंशो वंशानुचरितमिति ॥ ईशानुकथानुकथा संस्था निरोधः अपैवतैवा संतिकलय
रूपा मुक्तिरपि तत्रोक्ता हेतुर्जीवो अपाश्रयस्तु ब्रह्मसाक्षाद्भूतो नाचोन्नयो गृहीत्वा ॥ ७ ॥ दशभिर्लक्षणैर्युक्तं महापुरा

कश्यपोऽहं च सावर्णी रामशिष्योऽकृतव्रणः ॥ अधीमहि व्यासशिष्यात्तत्त्वतो मूलसंहिताः ॥ ५ ॥ पु
राणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितं ॥ शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ॥ ८ ॥ सर्गोऽस्याथ
विसर्गश्च वृत्ती रक्षान्तराणि च ॥ वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ॥ ९ ॥ दशभिर्लक्षणैर्यु
क्तं पुराणं तद्विदो विदुः ॥ केचित्पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया ॥ १० ॥ अव्याकृतगुणक्षोभा
न्महतस्त्रिवृतोऽहमः ॥ भूतसूक्ष्मेन्द्रियार्थानां संभवः सर्ग उच्यते ॥ ११ ॥

णं विदुः केचित्पञ्चविधं सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च वंशानुचरितं चेति पुराणं पञ्चलक्षणमिति म
हद्भ्यं पुराणं अल्पं चेति व्यवस्थया दशापि लक्षणानि निरूपयितुं उपक्रमते महापुराणे पञ्च तत्रेतरेषां वा स्वाभाविकत्वम्
विवक्षया न दोषमिति व्यवस्थया सम्पूर्ण ॥ १० ॥ सर्गादिलक्षणानि व्याचष्टे ॥ अव्याकृतेति ॥ आदिना प्रधानक्षोभात्
महतश्च महान्तरमात्रिवृदहंकारः ॥ तस्माद्भूतमात्राणां इन्द्रियाणां च तदर्थानां च तद्देवतानां च सम्भ
वः सर्गः कारणसृष्टिः सर्ग उच्यते इति यथापेक्षाऽन्वयः ॥ ११ ॥

२२

एवंस्तुतः ॥ प्रसादितेन ॥ ७३ ॥ पंचदश शाखा येषां यातयामानि ते पदविभिन्नैर्यजुर्भिरकरोत् ॥ सतैरिति पाठे याज्ञवल्क्यः ब
हुभिर्यजुर्भिरकरोदिति जगृहुरध्यैनवंतः ॥ विभागमाह वाजसन्यः ॥ केसरेभ्यः वा वेगेन वा संन्यस्ताः स्वगताः शाखा
वाजसनीसंस्ताः ताः काण्वादयः ॥ ७४ ॥ साम शाखा विभागमाह जैमिनिरिति त्रिभिः ततः ताभ्यां पुत्रपौत्राभ्यां क्रमेण
एकैकां प्राह ॥ ७५ ॥ तच्छिष्यो जैमिनिशिष्यो महान् अतिमेधावी सहस्रसंहिताभेदं चक्रे साम्नां ततः संहिता भेदं त
तत्कृतवान् ॥ ७६ ॥ सुकर्मणः शिष्यावेकः कौशल्यो हिरण्यनाभः पौष्यञ्जिरेकः तौ जगृहतुः तस्यैव शिष्यः

सूत उवाच ॥ एवं स्तुतः स भगवान्वाजिरूपधरो हरिः ॥ यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥ ७३ ॥ यजुर्भि
रकरोच्छाखा दश पंच शतैर्विभुः ॥ जगृहुर्वाजसंन्यस्ता ॥ काण्वमाध्यंदिनादयः ॥ ७४ ॥ जैमिनेः सामगा ।
स्यासीत्सुमंतुस्तनयो मुने ॥ सुत्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहितां ॥ ७५ ॥ सुकर्मा चापि तच्छिष्यः
सामवेदतरोर्महान् ॥ सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विजः ॥ ७६ ॥ हिरण्यनाभः कौशल्यः पौष्यं
जिश्च सुकर्मणः ॥ शिष्यौ जगृहतुश्चान्य आवंत्यो ब्रह्मवित्तमः ॥ ७७ ॥ उदीच्याः सामगाः शिष्या आसंप
चशतानि वै ॥ पौष्यंज्यावंत्ययोश्चापि तांश्च प्राच्यान्प्रचक्षते ॥ ७८ ॥ लौगाक्षिर्मांगलिः कुल्यः कुसीदः
कुक्षिरेव च ॥ पौष्यंजिशिष्या जगृहुः संहितास्ते शतंशतं ७९

सोऽपि जग्राह ॥ ७७ ॥ पौष्यंज्यावंत्ययोरपि च का
रान्हिरण्यनाभस्यापि पंचशतानि शिष्या आसन्नेव ते तत्र वृत्ती ॥ ॥ शाखाय पायपंजगृहुः तानुदीच्यान्नाम ततः कालतः
कांश्चिच्छिष्यान्प्राच्यान्स्वपृथक्त्वेनाप्यपठेः ॥ यच्चोक्तं वैष्णवे उदीच्याः सामगाः शिष्याः तस्य पंचशतं स्मृताः हिरण्य
नाभस्यावंत्यः संहिता यैर्द्विजोत्तमैः ॥ गृहीतास्तेऽपि चोच्यंते पंडितैः प्राच्यसामगा इति ॥ ७८ ॥ पुनरप्येतेषां त्रयाणां
सुकर्मणः ॥ शिष्याणां शिष्यानाह ॥ लौगाक्षिर्मांगलिरिति द्वाभ्यां ॥ ७९ ॥ ॥

श्री
माहा
टी
२

कर्दितस्यादानं विप्ररूपेणानुचितमिति ॥ त्रिशिराः पदत्रिविशेषणः भूम्यात्मा भुवः भूम्या आत्मा देहः ततस्त्रैलोक्यत्रयीयाइति
प्रसिद्धाः स्वपेशलाः श्रुतिरसा ॥ बहुवचनं समस्तेविवक्षया ॥ ८७ ॥ कालस्मार्थं दिनादिशालाप्रसंगे माह ॥ या
ज्ञवल्क्य इत्यादिना ॥ गुणार्थं प्राणायनं सेव्यामे तवविभूत्यनुज्ञानात् विप्रामानानिश्रुतिपितृधिकानि वेषपन ॥ सूर्यय
पतस्य समस्तकलहावर्ध्रुवं वेदमन्तरपाव ज्योतिः भूर्भुवः पूर्वाह्निरिविदैवईयते ॥ यजुर्वेदेनतिष्ठतिमध्यन्दिने
सामवेदास्तसमये महीयते वेदैरूपमाचिन्त्य तिसृष्वपि ॥ ८७ ॥ ॐ नमो भगवते आदित्याय तस्य एषामभवानेकरूपवेमा

यत्नं भिलितिस्त्रिया भूम्यातल्लोलुपतयादेडुः ॥ नैमिषीयाइतिमनुः प्राणायामसरूपेशालाः ॥ ८८ ॥ याज्ञवल्क्य
स्ततो ब्रह्म संदासाभिमिनवेषपन ॥ गुणोरविशयमानानिसूपतायेषु कोवीक्षक ॥ ८९ ॥ याज्ञवल्क्य उवाच ॐ
नमो भगवते आदित्याय अखिलजगतामात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मा
दिस्तंभपर्यन्तानामंतर्हृदयेषु बहिरपि चाकाश इवोपाधिनाव्यवधीयमानो भगवानेक एव क्षणलवनिमेषा
वयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ॥ ९० ॥ ॥ सुगम

ग्रं १

लोकयात्रामनुवहतीतिअन्वयः ॥ नसेवरवदर्शयति अखिलजगतामात्मस्वरूपेणान्तर्हृदयेषु कालस्वरूपेण च बहि
रपि मानइति ॥ अखिलजगतामित्यस्य प्रपंचः ॥ चतुर्विधेति हृदयान्तर्वर्तित्वेपिजीववन्नोपाधिनाव्यवधीयमानः
अनाच्छाद्यमानः कालस्वरूपेणोक्तस्य प्रपंचः क्षणेति क्षणलवादयो येवयवास्तैरुपचिताः संवत्सरास्तेषां गणेनेत्य
र्थः मादानविसर्गाभ्यां विसर्गो वृष्टिस्ताभ्याम् अनेन गायत्रीप्रथमपादोक्तं वरेण्यत्वं वर्णितं ॥ ९० ॥ ॥ ॥
॥ ॥ ॥

79

२

तस्य तः मंडूकेयसुतः शाकल्यो वात्स्यादिषु पंचसु प्रधात तान् अध्यापयामास सत्पर्वी ॥ ५४ ॥ तच्छिष्यः शाकल्य
शिष्यः स्वसंहितां त्रिधा विभज्य चतुर्थं वैदिकाय दार्थं व्याख्यानरूपं निरुक्तं चक्रुः बालकादिभिः चतुर्थं ब्याद
दौ ॥ ५५ ॥ वाष्कलिः पूर्वोक्तस्य वाष्कलस्य पुत्रस्यः प्रतिशाखाभ्यः बलाकाद्याः स्कन्दामादयः पृथीतवंतः ॥ ५६ ॥ ...
देवोपसंहारपूर्वकं तत्कृत्वा फलमाह बहूचाइति एतत्कुरु स्वां एते घोरूदसा ॥ ५७ ॥ यजुर्वेदस्येति तिरीयशाखा सोमशिव

शाकल्यस्य तत्सुतस्य शाखासु पंचधा व्यस्य संहितां ॥ वात्स्यमुद्गलशालीयगोखल्य शिशिरेषु यात ॥ ५८ ॥ तानुक्रम्य
स्य तच्छिष्यः सनिरुक्ता स्वसंहितां ॥ बलाकपैल वैतालविरजेभ्यः पाददौ मुनिः ॥ ५९ ॥ वाष्कलिः प्रतिशाखाभ्यो
वालखिल्याख्यसंहितां ॥ चक्रे बालायनिर्भज्य कासाराय शिवतारोदधुः ॥ ६० ॥ बहूचाः संहिताः पता पभिर्ब्रह्मर्षि
भिर्धृताः ॥ श्रुत्वैतत्कुंदसां व्यासं सर्वपापैः प्रमुच्यते ॥ ६१ ॥ वैशंपायनशिष्या वै चरकाध्वर्यवोभवन् ॥ यच्चेरुर्ब
ह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ॥ ६२ ॥ याज्ञवल्क्यश्च तच्छिष्य आहोहो भगवन्कियत ॥ चरितेनाल्पसाराणां च
रिष्येहं सुदुश्चरं ॥ ६३ ॥ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ॥ विप्रावमंत्रा शिष्येण मदधीतं त्यजाशु
ति ॥ ६४ ॥ देवरातसुतः सोपि छर्दित्वा यजुषां गणं ॥ ततोगतो थ मुनयो ददृशुस्तान् यजुर्गणान् ॥ ६५ ॥ दी

स्तोवमाह वैशंपायनशिष्याः स्वादिना चरकसंज्ञा सनिरुक्तिमाह ॥ यद्यस्मात् चेरुरिति ब्रह्महत्यारूपमंहः क्षपण
मिति तत्पातत्व गुरोरनुष्ठेयं व्रतं तत्करणात् चरका इत्यर्थः ॥ ६२ ॥ तच्छिष्यः वैशंपायनशिष्यः अल्पसाराणामेतेषां
चरितेन कियत् सुदुष्करमहं चरिष्यामीति ॥ ६३ ॥ विप्रावमंत्रा प्रवर्तकत्वं मदधीतमाशु त्यजेति ॥ ६४ ॥
देवरातसुतो याज्ञवल्क्यः ॥ ६५ ॥

तत्कीर्तनेनापि किमित्यपेक्षायां तन्महिमानमाह द्वाभ्यां पतितः कूपादिषु स्खलितः सोपानादिषु आर्तः दुःखितः क्षुत्त्वा क्षुतं
कृत्वा विवशोऽपि ४७ संकीर्त्यमानः यद्वा श्रुतोऽनुभावो यस्य सः पुंसां चित्तं प्रविश्य विधुनोति शोधयति दुःखं विधुनोतीति द्वौ
तिसन्तापं तु अर्कवत् प्रमाणयति अर्कोऽतिवातो ह्यभ्रादिभ्यो निवर्तयतीत्यपि विशेषयन् दृष्टान्तद्वयमाह अतिवातोऽभ्रमि
विति ४८ हरिसंकीर्तनमेव महाफलं तत्प्रतिबिंबं सर्वमिथ्यालापमिति प्रपंचयति मृषा गिर इति चतसृभिः

पतितः स्खलितो वार्तः क्षुत्त्वा वा विवशो ब्रुवन् ॥ हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥ ४७ ॥ संकीर्त्य
मानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसां ॥ प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवा
तिवातः ॥ ४८ ॥ मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ॥ तदेव सत्यं तदु हैव मंग
लं तदेव पुण्यं भगवद्गुणोदयं ॥ ४९ ॥ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवं ॥ तदे
व शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥ ५० ॥ न यद्वचश्चित्रपदं हरेर्यशो ज
गत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥ ५१ ॥

मृषा गिरः मिथ्यावाचः असतीः असत्याः सम्भुदयो यस्मात् ॥ ४९ ॥ नवं नवं यथा भवति तथा रुचिरं विशदं
महोत्सवो यस्मात् ॥ ५० ॥ चित्राणि पदानि यस्मिन् तदपि जगत्पवित्रयतीति तथा तद्धरेः यशो न गृणीत न
वर्णयेत् ॥ तद्वचः ध्वांक्षतीर्थं काकतुल्यनराणां रतिस्थानं न तु हंसैः ज्ञानिभिः सेवितं चित्रपदं रमणीयपादं
तत्र हेतुः यत्रेति ॥ ५१ ॥ राम ॥

सवाविसर्गः सएववाग्विसर्गोयोगः जनताघसंप्लवः जनसमूहानामघनाशकः यद्यस्मात्तन्नामेनामेः कीर्तिमन्नामानि शृण्वंति
श्रीनविसत्तिगायंति नोचेत्स्वयमेवगृणंति ॥५२॥ इदानींज्ञानकर्मादरस्यापि श्रीभगवत्कीर्तनादिषुवादवःकर्त
व्यइतिचाह नैष्कर्म्यंनक्ष्मकांशककर्य ज्ञानं नयतोतिनिरंजनस्यपापितिविवर्तकं नदपि अच्युतभक्तिवर्जितं चेत्तत्र शोभ
तेन परोत्पन्नपर्यंनं भवतीत्यर्थः॥ ईश्वरे नैवेदर्पितं नतर्हियदप्युत्तमं संकीर्तनसमपि कर्मतदपिपुनः अतःशोभेतयतःसु
सत्साधनेकाले फलकाले च श्रभद्रःखात्मकं ॥५३॥ किंचवर्णाश्रमाचारादिषुयः परोमहान् परिश्रमः सया।

सवाग्विसर्गोजनताघसंप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि॥ नामान्यनंतस्ययशोंकितानि यच्छृण्वंति
५ गायंति गृणंति साधवः॥५५॥ नैष्कर्म्यमप्यच्युतभाववर्जितं नशोभतेज्ञानमलं निरंजनं॥ कुतःपुनः
शश्वदभद्रमीश्वरे नचार्पितं कर्मयदप्यनुत्तमं॥५३॥ यशःश्रियामेवपरिश्रमः परोवर्णाश्रमाचार
तपःश्रुतादिषु॥ अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः॥५४॥ अविस्मृतिः
कृष्णपदारविंदयोः क्षिणोत्यभद्राणिशमंतनोतिच॥ सत्त्वस्यशुद्धिं परमात्मभक्तिं ज्ञानंचविज्ञानवि
रागयुक्तं॥५५॥ यूयंद्विजाग्र्याबतभूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं॥ नारायणंदेवमदेवमीशम
जस्रभावाभजताविवेश्य॥५६॥

यशोयुक्तायांश्रियामेव कीर्तिः संपत्तिश्चकेवलं नपरमपुरुषार्थइत्यर्थः॥ गुणानुवादादिभिस्तुश्रीधरपादप
द्मयोरविस्मृतिर्भवति॥५४ ततः किमतआह॥ अविस्मृतिरिति क्षिणोति विनाशयति॥५५॥ यस्मादेवं तस्मात्तन्ना
मैवाभिनंदन्नाह यूयमिति द्वाभ्यां हेद्विजाग्र्याःशौनकादयः यद्यस्मादात्मन्यंतःकरणे श्रीनारायणमाविवेश्यप्र
श्रद्दजनैः संभावनायालोष्टुनतोभूरिभागाबहुभाग्यवंतेमाः कथंभूतं सर्वेषामात्मभूतं अतएवदेवं सर्वोपास्यमदेवोः स्व

यस्मात्तत्कीर्तिः श्रियदायकस्मात् पूर्वभिः भगः तयक्षादि घोनसंपदतात
सौनातयाभक्तेतिविधिः ॥५८॥

ममयाश्रुतं ॥५७॥ एतत्कीर्तनादि फलं प्रपंचयितुमाह य एतदित्यष्टभिः ॥५८॥ यामक्षणं चेयमर्थः आत्मानमेव सान्ना
तुनाति न तत्स्नानादि वेदेह्रमाव ॥५९॥ ऋचो यजूंषीति द्विजो मधुकुल्यादि यदनुविंदते तत्फलमेतां पठित्वाश्रुतवि

९३

अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ॥ प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां म
हतां च शृण्वतां ॥५७॥ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः ॥ माहात्म्यं वासुदेवस्य सर्वाशुभविना
शनं ॥५८॥ य एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः ॥ श्रद्धावान्योनुशृणुयात्पुनात्यात्मानमेव सः ॥५९
द्वादश्यामेकादश्यां वा शृण्वन्नायुष्यवान्भवेत् ॥ पठत्यनश्नन्प्रयतः ततो भवत्यपातकी ॥६०॥ पुष्क
रे मथुरायां च द्वारवत्यां यतात्मवान् ॥ उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ॥६१॥ देवता मुन
यः सिद्धाः पितरो मनवो नृपाः ॥ यच्छंति कामान्गृणतः शृण्वतो यस्य कीर्तनात् ॥६२॥ ऋचो यजूंषि सा
मानि द्विजोधीत्यानुविंदते ॥ मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं ॥६३॥ पुराणसंहितामेता
मधीत्य प्रयतो द्विजः ॥ प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ॥६४॥ विप्रोधीत्याप्नुयात्प्रज्ञां राजन्योद
धिमेखलां ॥ वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात् ॥६५॥ कलिमलसंहतिकालनोखिलेशो
हरिरितरत्र न गीयते ह्यभीक्ष्णं ॥ इह तु पुनर्भगवानशेषमूर्तिः परिपठितोनुपदं कथाप्रसंगैः ॥६६॥

दति ॥६३॥ किंच प्रोक्तमिति ॥६४॥ राजन्य उदधिमेखलां पृथ्वीं संधिराधीः ॥६५॥ अस्य पुराणस्य श्रीमद्भागव
तारव्यस्य वैभवातिरेकं कारणमाह कलिमलानां संहतिसमूहं कालयति विनाशयतीति तथा इतरत्र
पाणस्तोतरे ॥६६॥ रामः ॥

शास्त्रप्रतिपादितं श्रीभगवंतं नमस्करोति तमिति द्वाभ्यां जगदुदयस्थितिसंयमात्मनो रजआद्यः शक्तयो यस्य तं द्युप-
तिभिर्देवैरपि दुरवसितः अज्ञातः स्तवः स्तोत्रं यस्य तं ॥६७॥ उपचितनवभिः शक्तिभिर्नवधाशक्तिभिः प्रकृतिपुरुषमहदह-
ंकारतन्मात्ररूपाभिः स्वआत्मन्येवोपरचितं स्थिरजंगमसंघालयं यस्य तस्मै श्रीभगवते ॥६८॥ श्रीगुरुं नमस्करोति
स्वसुखेनैव निभृतं परिपूर्णं चेतो यस्य सः तेनैव व्युदस्तः अन्यस्मिन् भावो यस्य तथाभूतोपि अजितस्य रुचिराभिर्लीला-

तमहमजमनंतमात्मतत्वं जगदुदयस्थितिसंयमात्मशक्तिं ॥ द्युपतिभिरजशक्रशंकराद्यैर्दुरवसितस्त-
वमच्युतं नतोस्मि ॥६७॥ उपचितनवशक्तिभिः स्वआत्मन्युपरचितस्थिरजंगमालयाय ॥ भगवत उपल-
ब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ॥६८॥ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोप्यजितरुचिरली-
लाकृष्टसारस्तदीयं ॥ व्यतनुत कृपया यस्तत्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोस्मि ॥६९॥
इति श्रीभागवते द्वादशस्कंधे श्रुतिसंक्रमलक्षणमाहात्म्यवर्णनं नाम द्वादशोध्यायः ॥१२॥ सूत उवाच ॥ यं ब्रह्मावरु-
णेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः ॥ ध्यानावस्थित-
तद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥१॥ पृष्ठे भ्राम्य-
दमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पांतु वः ॥ यत्संस्कारक-
लानुवर्तनवशाद्वेलानिभेनांभसां यातायातमतंद्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥२॥ ॥ राम

भिराकृष्टः सारः स्वसुखं गतं धैर्यं यस्य सः तत्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतोस्मी-
ति ॥६९॥ इति श्रीमद्भावार्थदीपिकायां द्वादशे द्वादशः ॥१२॥ सर्वपुराणसंख्यादीनुपवर्णयिष्यन् तन्न स्तुतिपाठं दे-
वप्रणाममतिस्तवैर्वेदैस्स्तुतत्वेति स्तवैरिति उपनिषद्रूढस्याकारं ततं तत्र कैटेदानुरोधेनावस्थिता निश्चलं तत्तेतेय मनः ते

त्रयोदशे पुराणानां संख्यामाहात्म्यपक्रमे । दानं दानस्य माहात्म्यं
श्रीमद्भागवतस्य च । टीकाश्लोका ।

श्री॰
भाग्व॰
टी॰
४१

85

महाभारतं तु इतिहासः विस्तृतधर्मो निर्वेचेतिहासस एव श्रीरामायणं च ऋषिनोक्तं काव्यं अतः पुराणानां संदोहः समू हश्चतुर्लक्षसंख्याक एव ॥ इदानीं अस्य वाच्य प्रयोजनादीन्दर्शयितुमाह नवेत्यादिना ॥४॥ हरिलीलाकथा नां व्रा तः समूहः स एव ॥

एवं पुराणसंदोहः चतुर्लक्ष उदाहृतः ॥ तत्राष्टादशसाहस्रं श्रीभागवत मिष्यते ॥४॥ इदं भगवता पूर्वं ब्रह्मणो नाभिपंकजे ॥ स्थिताय भवभीताय कारुण्यात्संप्रकाशितं ॥८॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतं हरिलीलाकथाव्राता मृतानंदितसत्सुरं ॥९॥ सर्ववेदांतसारं यद्ब्रह्मा त्मैकत्वलक्षणं ॥ वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनं ॥१०॥ प्रौष्ठप द्यां पौर्णमास्यां हेमसिंहसमन्वितं ॥ ददाति यो भागवतं स याति परमां गतिं ॥१२॥ राजंते तावदन्यानि पुराणानि सतां गणे ॥ यावद्भागवतं नैव श्रूयतेमृतसागरं ॥१४॥ सर्ववेदांतसारं हि श्रीभागवतमिष्यते तद्रसा मृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित ॥१५॥ ॥ रामायनमोनमः ॥ ॥ ॥

गच्छे ३

यावन्नश्रूयते साक्षाच्छ्रीमद्भागवतं परं २

मृतं तेनानंदिताः संतः सुराश्च येन तत् ॥९॥ तन्निष्ठं तद्विषयं ॥१२॥ प्रौष्ठपद्यां भाद्र्यां हेमसिंहसमन्वितं स्वर्णसिं हासनारूढं तच्च स एवामृतं तेन तृप्तस्य निर्वृत्तस्य ॥१५॥ ॥ ॐ नमो रामाय रामचंद्राय नमोनमः ॥ ॥ ॥८ ॥ ८॥

४१

त्रीरोदमथनादौ उत्तैर्यत्वमेव प्रदर्शयितं कूर्मावतारमत्र स्मारयन्नाशिषं प्रार्थयते ॥ पृष्ठे भ्राम्यत् अमंदो गरिष्ठो
मंदारगिरिस्तस्य ग्रावाणः तेषामग्राणि तैः कंडूयनात् तेन सर्वेन निद्रालोर्निद्राशीलस्य येषां श्वासानिलानां सं
स्काराः तेषां कलास्त्वलेशाः तदनुवर्तनवशात् ॥ जलनिधेर्यत्संयातायातं न विश्राम्यति नत्र समुद्रे तोभादेव तत्
नमस्कारवशात् तत्राह वेलातोभः वेलातटऊर्मीणां तोभं तस्य निभेन मिषेणेति पूर्वस्याटीका ॥ ३ ॥ पुराणसं
ख्यं

सूत उवाच ॥ पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने ॥ दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ॥ ३ ॥ ब्रा
ह्मं दशसहस्राणि पाद्मं पंचोनषष्टि च ॥ वैष्णवं त्रयोविंशच्चतुर्विंशति शैवकं ॥ ४ ॥ दशाष्टौ श्रीभागव
तं नारदं पंचविंशतिः ॥ मार्कंडं नव वाह्नं च दशपंचचतुःशतं ॥ ५ ॥ चतुर्दश भविष्यं स्यात्तथा पंचशता
नि च ॥ दशाष्टौ ब्रह्मवैवर्तं लिंगमेकादशैव तु ॥ ६ ॥ चतुर्विंशति वाराहमेकाशीतिसहस्रकं ॥ स्कांदं
शतं तथा चैकं वामनं दश कीर्तितं ॥ ७ ॥ कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ॥ एकोनविंशत्सौ
पर्णं ब्रह्मांडं द्वादशैव तु ॥ ८ ॥

ख्याः तासां संभूतिं समाहारं च ॥ अस्य तु श्रीमद्भागवतस्य वाच्यं विषयं प्रयोजनं दानं तु पाठादेश्च निबोधत
त्रयोविंशत् त्रयोविंशतिः चतुर्विंशतिसहस्राणि शैवकं शिवपुराणं ॥ ४ ॥ वाह्नं तथाग्निपुराणं दशपंचसह
स्राणि चत्वारि शतानि ॥ ५ ॥ ६ ॥ स्कांदं शताधिकाशीतिसहस्रं ॥ ७ ॥ सौपर्णं गारुडपुराणं एकोनविंशत्

श्री भा॰ टी॰ ५२

तमेव देवतारूपेणात्मरूपेणा च प्रणामति ॥ नमस्तस्मै भगवते वासुदेवायेति ॥ नमस्यति श्रीमद्भागवतं व्याख्याय तदेव्याख्यानेन तदा भगवद्भक्तिवत्सलो ॥ ॥ २३ ॥ भावार्थदीपिका मेतां भगवद्भक्तिवत्सला ॥ श्रीपरानंदपादाब्जभृंगः श्रीश्रीधरोऽकरोत् ॥ स्वबालचापलात्तापैः स्वलीलापरिनतितैः श्रीयतां परमानंदरूपहरिः सकृपः स्वयं ॥ श्रीपरानंदसंप्रीत्यै श्रीभागवतं यथा विहृतं तन्मतेनेदं नत्त्वसम्मतिं

ॐ नमस्तस्मै भगवते वासुदेवाय साक्षिणे ॥ य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे ॥ ४१ ॥ योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ॥ संसारसर्पदष्टं यो विष्णुरातममूमुचत् ॥ ४२ ॥ भवे भवे यथा भक्तिः पादयोस्तव जायते ॥ तथा कुरुष्व देवेश नाथस्त्वं नो यतः प्रभो ॥ ४३ ॥ नामसंकीर्तनं यस्य सर्वपापप्रणाशनं प्रणामो दुःखशमनस्तं नमामि हरिं परं ॥ ४४ ॥ इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां द्वादशस्कंधे सूतशौनके त्रयोदशोऽध्यायः १३

समाप्तं भागवतनामपुराणं ॥ ॥ शुभमस्तु ॥

वैभवात् ॥ इति श्रीभावार्थदीपिकायां द्वादशस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ अदृष्टदोषान्मतिविभ्रमाद्वा यदर्थहीनं लिखितं मया तत्सर्वं सार्धैः परिशोधनीयं ॥ प्रायेण मुह्यंति हि ये लिखंति ॥ ॥ ॥ समाप्तं द्वादश

स्कं॰ ५२

पारमहंस्यं परमहंसैः प्राप्यं सर्वकर्मोपरमः भक्त्या तच्छ्रवणादिपरो विमुच्यते ॥१८॥ श्रीभागवतसंप्रदायप्रवर्तकरूपेण श्रीमद्भागवतव्याख्यानलक्षणं मंगलमाचरति । कस्मै ब्रह्मणे अतुलः असमः अयं श्रीभागवतरूपः पुराकल्पा।

निम्नगानां यथा गंगा देवानामच्युतो यथा ॥ वैष्णवानां यथा शंभुः पुराणानामिदं तथा ॥१६॥ क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा ॥ तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ॥१७॥ श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते ॥ यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥१८॥ कस्मै येन वि

विभासितोऽ

शंसितोयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ॥ योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यतः तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥१९॥ रामायनमः

दौ तद्रूपेण ब्रह्मरूपेण तद्रूपिणा नारदरूपिणा योगीन्द्राय शुकाय तदात्मना ॥ श्रीमत्कृष्णरूपेण तत्त्वं सं संश्रीनारायणाख्यं सत्यं धीमहीति गायत्र्यर्थं यथोपक्रममुपसंहरन् ॥ गायत्र्याख्या ब्रह्मविद्येयमिति दर्शयति ॥१९॥ राम ॥ राम ॥